# संस्कृतसाहित्यम्

## संस्कृत-शास्त्रम्

### ऐच्छिकम्



कक्षा ८

# संस्कृतसाहित्यम्

## (संस्कृत–शास्त्रम्)

## ऐच्छिकम्

## कक्षा ८

प्रकाशक

जनक शिक्षा सामग्री केन्द्र लिमिटेड

सानो ठिमी, भक्तपुर

सर्वाधिकार जनक शिक्षा सामग्री केन्द्र लिमिटेडमा सुरक्षित

पाठ्यक्रम (२०३८) अनुसार
पहिलो संस्करण २०४१ मंसीर
दोस्रो संस्करण २०४७ फागुन

तपाईंले किनेको पुस्तकमा छपाइ प्रविधिसम्बन्धी कुनै त्रुटि फेला परेमा अधिकृत वितरक (साझा) अथवा स्थानीय विक्रेताबाट उक्त पुस्तक साट्न सक्नुहुने छ।
ज. शि. सा. के. लि.

मूल्य ६।४५

जनक शिक्षा सामग्री केन्द्र लिमिटेड (एजुकेशन प्रेस) मा मुद्रित ।



"राष्ट्रिय प्रतिभालाई फलाउने, फुलाउने
तथा जनताको मनोभावनालाई
विकासमूलक बनाउने नीति लिई लागू
गरिएको यस राष्ट्रिय शिक्षा
योजनाबाट केही वर्ष भित्रै एउटा
जागरूक परिश्रमी र उन्नतिशील
समाजको सिर्जना हुन सक्ने छ भन्ने
मैले आशा लिएको छु।"

— श्री ५ वीरेन्द्र

# हाम्रो भनाइ

शिक्षालाई जीवन सापेक्ष गराई राष्ट्रिय एकता, सार्वभौमिकता, राजमुकुट र स्वतन्त्रताको रक्षा गर्ने, कर्तव्यनिष्ठ नागरिक तयार गराउने, सामाजिक जीवनयापनका लागि आवश्यक ज्ञान र सीप हासिल गराउने राष्ट्रिय शिक्षा पद्धतिको योजना २०२८ को विशुद्ध उद्देश्य अनुरूप विद्यालयस्तरका पाठ्यक्रम र पाठ्यपुस्तकहरूको विकास गर्ने प्रक्रिया चालू रहिआएको छ।

श्रमप्रति श्रद्धा जगाई उपयोगी नागरिक तयार गराउने र देशभक्ति, राजभक्ति तथा ईश्वरभक्ति सिकाई अनुशासित सुयोग्य नागरिक तयार गराउने माध्यमिक शिक्षाको उद्देश्यमा आधारित संशोधित पाठ्यक्रम २०३८ अनुसार यो पाठ्यपुस्तक तयार गराई प्रकाशमा ल्याइएको छ

यस पाठ्यपुस्तकको संकलन तथा सम्पादन श्री शम्भुप्रसाद दाहालले गर्नुभएको हो।

सम्बन्धित विषयका अनुभवी शिक्षक, प्राध्यापक एवं विशेषज्ञहरूको सुझाव समेतलाई ध्यानमा राखी यस पाठ्यपुस्तकलाई सकेसम्म स्तरयुक्त बनाउने प्रयास गरिएको छ तापनि यसमा भाषागत, विषयगत र शैलीगत कतिपय त्रुटिहरू अझ हट्न नसकेका होलान्, तिनका सुधारका लागि शिक्षक, अभिभावक, विद्यार्थी लगायत सबै बुद्धिजीवी पाठकहरूको सक्रिय सहयोगको महत्त्वपूर्ण भूमिका रहने हुँदा यस पवित्र सेवाकार्यमा यहाँहरूको रचनात्मक सुझावको यो केन्द्र सदैव स्वागत गर्दछ।

श्री ५ को सरकार
शिक्षा तथा संस्कृति मन्त्रालय
पाठ्यक्रम पाठ्यपुस्तक तथा निरीक्षण विकास केन्द्र
सानो ठिमी, भक्तपुर।

# विषयसूची


**चन्द्रालोकः**

काव्य–लक्षणम् १
अलङ्कार स्वरूपम् ३
अलङ्कार विभागः ३

**शब्दालङ्काराः** ४

(क) छेकानुप्रासः ४
(ख) वृत्यनुप्रासः ४
(ग) स्फुटानुप्रासः ४

**अर्थालङ्काराः** ५

(क) उपमा ५
(ख) अनन्वयः ५
(ग) रूपकम् ६
(घ) उल्लेखः ६
(ङ) उत्प्रेक्षा ६
(च) व्यतिरेकः ७
(छ) विभावना ७
(ज) विशेषोक्तिः ७
(झ) स्वभावोक्तिः ८

**छन्दः** १०

गण–परिचयः १०
लघु–गुरु वर्णनियमाः १०
पद्य स्वरूपम् ११
अनुष्टुभ् ११
इन्द्रवज्रा ११
उपेन्द्रवज्रा ११
उपजातिः १२
वंशस्थम् १२
वसन्ततिलका १२

हितोपदेशः

रघुवंश महाकाव्यम् १४
कालिदासस्य परिचयः ३१

रघुवंश प्रथमसर्गस्य कथासारः ३२

रघुवंशोद्भवानां राज्ञां वर्णनम् ३२
दिलीपवर्णनम् ३२
दिलीपस्य वशिष्ठाश्रमगमनम् ३३
आश्रमवर्णनम् ३३
गुरुणा सह वार्ता ३३
(नन्दिनी) धेनुवर्णनम् ३४
गोसेवा प्रकारः ३४
प्रथमः सर्गः ३५

# चन्द्रालोकः

चन्द्रालोकस्य रचयिता जयदेवः संस्कृत-साहित्ये लब्धप्रतिष्ठ आचार्य आसीत्। 'पीयूष वर्ष' इत्यस्य अपरं नामधेयमासीत्। अस्य पितुर्नाम 'महादेवः' मातुश्च 'सुमित्रा' इति चन्द्रालोकग्रन्थात् प्रतीयते। अयं कौडिण्यगोत्रोत्पन्नो विदर्भदेशस्थकुण्डिनपुरवास्तव्य आसीत्।

अस्य समयो द्वादशशताब्द्या उत्तरभागः, त्रयोदशशताब्दी वा मन्यते।

जयदेवेन चन्द्रालोकः (लक्षणग्रन्थः) प्रसन्नराघवं (नाटकम्) चेति ग्रन्थद्वयं विरचितम्। चन्द्रालोके १० मयुखाः सन्ति, यत्र प्रथमे काव्यलक्षणम्, द्वितीये दोषाः, तृतीये लक्षणानि, चतुर्थे गुणाः, पंचमेऽलङ्काराः, षष्ठे रस-रीति-वृत्तयः, सप्तमे ध्वनिभेदाः, अष्टमे गुणीभूतव्यङ्ग्यभेदाः, नवमे लक्षणा, दशमेऽभिधावृत्तिश्च निरूपिताः। एष चन्द्रालोको ग्रन्थः प्राचीनकालादेव लब्धबहुप्रचारः, अध्ययनाध्यापनक्षेत्रे सम्मानितश्चास्ति।

## काव्य-लक्षणम्

काव्यस्य लक्षणसम्बन्धे संस्कृतसाहित्ये बहूनि मतानि प्राप्यन्ते। केचन विद्वांसः शब्दमेव काव्यं मन्यन्ते, केचन शब्दार्थौ काव्यं मन्यन्ते, केचन रमणीयार्थसम्पन्नशब्दं काव्यं मन्यन्ते। अत्र चन्द्रालोकस्य निर्मातुर्जयदेवस्य मतमनुसृत्य काव्यस्वरूपं प्रतिपाद्यते।

**निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।**
**सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्॥ (चन्द्रालोकः १।७)**

**अर्थः**- दोषरहिता, अक्षरसंहत्यादिलक्षणसहिता, रीतियुक्ता, श्लेषादिगुणभूषिता, अलङ्काररससंयुक्ता, अनेकवृत्तिसमेता, वाक् (शब्दः) काव्यनामभाक् भवति काव्यसंज्ञा भवतीत्यर्थः। अर्थात् तादृशः शब्दः काव्यं मन्यते, यत्र दोषा न स्युः, लक्षणानि, गुणा, रीतयः अलङ्काररसाः वृत्तयश्च स्युः। एतेन निर्दोषाद्युक्तधर्मविशिष्टशब्दत्वं काव्यत्वमिति काव्यलक्षणं सम्पन्नम्।

अत्रैका शङ्का समुदेति यत् काव्यप्रकाशस्य निर्माता मम्मटनामक आचार्यः स्वग्रन्थे काव्यलक्षणं निर्दिशन् अलङ्काराणामनिवार्यतां निरस्यति, तत् कथमत्र सङ्गच्छते? तथाहि मम्मटेन काव्यलक्षणे 'अनलङ्कृती पुनः क्वापि' इत्युक्त्वा 'सर्वत्र सालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः' इत्यभिप्रायः प्रकाशितः। इमां शङ्कां निराकुर्वन् मम्मटोक्तं काव्यलक्षणं च दूषयन् जयदेवः स्वग्रन्थे कथयति-

अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।
असौ न मन्यते कस्मादनुष्णमनलङ्कृती ॥ (चन्द्रालोकः १।८)

यो जनोऽलङ्कारशून्यो शब्दार्थौ काव्यत्वेन स्वीकरोति, सोऽग्निमपि उष्णतारहितं कथं न मन्यते ? यथोष्णताशून्योऽग्निरसम्भवः, तथैव अलङ्कारशून्ययोः शब्दार्थयोः काव्यत्वमसम्भवम् इत्याशयः ।

**शब्दस्वरूपं तद्भेदाश्च–**

**काव्यलक्षणे वाक् (शब्द) पदस्य उल्लेखो जातः । तत्स्वरूपमत्र प्रदर्श्यते**

सुप्– तिङन्तानां विभागानामुत्पत्तये योग्यो वर्णसमुदायः शब्द उच्यते । स च रूढ–यौगिक–योगरूढभेदेन त्रिविधः ।

यत्र केवलं प्रसिद्धिबलेन अर्थबोधो भवति, प्रकृति–प्रत्ययादि ज्ञानस्य आवश्यकता नास्ति स रूढः । यथा – डित्थादि ।

यत्र प्रकृति–प्रत्यययोगबलेन अर्थबोधो भवति, प्रसिद्धेरपेक्षा नास्ति स यौगिकः । यथा– पाचकादि ।

यत्र व्युत्पत्तेः प्रसिद्धेश्च बलेन अर्थबोधो भवति स योगरूढः । यथा पङ्कजादि ।

उक्तानां त्रिविधशब्दानां प्रत्येकं पुनस्त्रिविधतया नवसंख्यकाः शब्दभेदा भवन्ति । शब्दभेदस्य तालिकाऽत्र प्रस्तूयते ।

**शब्दः**

| रूढः | यौगिकः | योगरूढः |
|---|---|---|
| १. अव्यक्तयोगः । | १. शुद्धयौगिकः । | १. सामान्यार्थ विशेषार्थबोधकः |
| २. अव्यक्तनिर्योगः । | २. यौगिकमूलयौगिकः । | २. विशेषार्थे सामान्यार्थबोधकः । |
| ३. योगाभासः । | ३. संभिन्नयौगिकः । | ३. सामान्यविशेषोभयविधार्थ-बोधकः । |

**पारिभाषिकशब्दानामर्थाः**

**दोषः–** काव्यसौन्दर्यप्रतिबन्धकः काव्ये त्याज्यस्तत्त्वविशेषः । श्रुतिकटुप्रभृतिदोषाणां निरूपणं चन्द्रालोकस्य द्वितीयमयूखे विहितम् ।

**लक्षणम्–** अक्षरसंहति–शोभा–भिमानादिकं काव्यज्ञापकं चिह्नम् । लक्षणानां स्वरूप–निरूपणं चन्द्रालोकस्य तृतीयमयूखे विहितम् ।

रीतिः— विशिष्टा पदरचना । पाञ्चाली, लाटीया, गौडीया, वैदर्भी चेति चतस्रो रीतयश्चन्द्रालोकस्य षष्ठमयूखे प्रतिपादिताः ।

गुणः— काव्ये रसनिष्ठो धर्मः । गुणनिरूपणं चन्द्रालोकस्य चतुर्थमयूखे कृतमस्ति ।

अलङ्कारः— काव्यशोभाजनकः शब्दार्थधर्मः । अलङ्कारनिरूपणं चन्द्रालोकस्य पंचममयूखे कृतम् ।

रसः— विभावानुभावव्यभिचारिभावैरभिव्यक्तः स्थायी भावः । श्रृङ्गारः, वीरः, करूणः, हास्यः, रौद्रः, भयानकः, बीभत्सः, अद्भुतः शान्तः, एते नवरसाः प्रसिद्धाः ।

वृत्तिः— (क) नाटचोपयोगिनी विलासविन्यासक्रमरूपा । कैशिकी, सात्वती, आरभटी, भारती चेति चर्तुविधा ।

(ख) रचनाविशेषरूपा । मधुरा, परूषा, ललिता प्रौढा, भद्रा चेति पंचविधा ।

(ग) अभिधा–लक्षणा–व्यञ्जनाख्या शब्दशक्तिः ।

## अलङ्कारस्वरूपम्

अलङ्करोति भूषयति काव्यम् इत्यलङ्कारः, अलङक्रियतेऽनेन काव्यम् इति वाऽलङ्कारः । उक्तया व्युत्पत्या अलङ्कारपदेन काव्यशोभासम्पादकाः चमत्कारजनकशब्दार्थसन्निवेशविशेषा उपमा–यमकादयः काव्यधर्मा बुध्यन्ते । यथा शरीरे कटक-कुण्डलादीनि हारादीनि वा भूषणानि शरीरस्य सौन्दर्यं वर्धयन्ति, तथैव उपमानुप्रासादयोऽलङ्कारा अपि शब्दार्थमस्य काव्यस्य शोभां वर्धयन्ति ।

अलङ्कारलक्षणं कुर्वन् चन्द्रालोककारो जयदेवः कथयति

**शब्दार्थयोः प्रसिद्धया वा कवेः प्रौढिवशेन वा ।**
**हारादिवदलङ्कारः सन्निवेशो मनोहरः ॥ (चन्द्रालोकः १।५)**

**अर्थः**—कवेः प्रसिद्धया प्रौढिकल्पनया वा शब्दार्थयोर्मनोहरश्चमत्कारजनकः सन्निवेशो विन्यासो हारादिवद् अलङ्कारो भवति ।

## अलङ्कार–विभागः

अलङ्काराः सामान्येन द्विप्रकारका भवन्ति, यथा-शब्दालङ्काराः, अर्थालङ्काराश्च । तत्र समानार्थकशब्दानां परिवर्तने योऽलङ्कारो न वर्तते स शब्दालङ्कारः । तादृशशब्दानां

परिवर्तनेऽपि यस्तिष्ठति सोऽर्थालङ्कारः। इत्थं च शब्दपरिवृत्यसहत्वं शब्दालङ्कारत्वम्, शब्दपरिवृत्तिसहत्वमर्थालङ्कारत्वमिति स्फुटम ।

## शब्दालङ्काराः

### (क) छेकानुप्रासः

स्वराणां व्यञ्जनानां च समूहरूपेणावृत्तिः छेकानुप्रासः । यथा

**स्वरव्यञ्जनसन्दोहव्यूहा मन्दोहदोहदा ।**

**गौर्जगज्जाग्रदुत्सेका छेकानुप्रासभासुरा (चन्द्रालोकः ५।२)**

अर्थः– स्वराणां व्यञ्जनानां च सन्दोहः साम्य तस्य व्यूह आवृत्तिर्यस्यां सा, मन्द ऊहो ज्ञानं तस्य दोहदा जनयित्री, जगति प्रकर्षपूर्णा वाणी (गौः) छेकानुप्रासभासुरा 'छेकानुप्रास' नाम्ना शोभमाना भवति । छेका विदग्धाः, तेषामनुप्रासः शब्दसाम्यरूपः शब्दालङ्कारः 'छेकानुप्रासः' कथ्यते । उदाहरणं चात्रैव श्लोके 'स्वरव्यञ्जनम्' इत्यत्र 'अकार' रूपस्वरसमूहस्यावृत्तिः। 'दोहव्यूह' इत्यत्र व्यञ्जनावृत्तिः दोह, दोह इत्यत्र स्वरव्यञ्जनोभयावृत्तिरिति छेकानुप्रासोऽलङ्कारः ।

### (ख) वृत्यनुप्रासः

यत्र आवृत्तवर्णयुक्ता चमत्कारजनकरचना वर्तते, तत्र 'वृत्यनुप्रासः।' चन्द्रालोके तल्लक्षणम् ।

**आवृत्तवर्णसम्पूर्णं वृत्यनुप्रासवद्वचः। (चन्द्रालोकः ५।३)**

अर्थः– आवृत्तवर्णपूर्णं वचनं (शब्दरचना) वृत्यनुप्रासयुक्तं भवति । यथा–

**अमन्दानन्दसन्दोहस्वच्छन्दास्पदमन्दिरम् ॥**

अत्र दकाररूपव्यञ्जनस्य पुनः पुनरावृत्ति ।

### (ग) स्फुटानुप्रासः

श्लोकस्यार्धे पूर्वार्धे उत्तरार्धे वा, तदर्धे पादे वा यदि वर्णावृत्तिर्भवति, तदास्फुटानुप्रासो भवति । चन्द्रालोके तल्लक्षणोदाहरणश्लोको यथा--

**श्लोकस्यार्धे तदर्धे वा वर्णावृत्तिर्यदि ध्रुवा ।**

**तदा मता मतिमतां स्फुटानुप्रासता सताम् । (चन्द्रालोकः ५।५)**

अत्र तकारमकारयोरावृत्तिरित्येको भेदः। अर्धे अर्धे इत्यत्र रेफयुक्तधकारावृत्तिरित्यपरो भेदः ।

# अर्थालङ्काराः

## (क) उपमा

यस्मिन् काव्ये उपमानोपमेययोः सादृश्यशोभाप्रकाशते, तत्र उपमालङ्कारः। उपमेयम्, उपमानम्, साधारणो धर्मः, उपमावाचकश्चेति चतुर्णां पदार्थानां सद्भावे पूर्णोपमा । एतेषु एकस्य द्वयोस्त्रयाणां वाऽसद्भावे लुप्तोपमा भवति ।
उपमायाः सोदाहरणं लक्षणं यथा

**उपमा यत्र सादृश्यलक्ष्मीरूल्लसति द्वयोः ।**
**हृदये खेलतोरूच्चैस्तन्वङगीस्तनयोरिव ॥ (चन्द्रालोकः ५।११)**

अर्थः– यत्र (काव्ये) हृदये स्फुरतोरुन्नतयोः सुन्दरीस्तनयोरिव उपमानोपमेययोः सादृश्यस्य शोभा प्रकाशते तत्रोपमालङ्कारः। अत्रोदाहरणे "द्वयोः" इति उपमेयम्, 'स्तनयोः' इति उपमानम्, "सादृश्यलक्ष्मीः" इति साधारणधर्मः, "इव इति" च वाचकपदं चेति पूर्णोपमा।
यथा वा तदुदाहरणम्–

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वती–परमेश्वरौ ॥**

## (ख) अनन्वयः

यत्र एकमेव पदम् उपमानमुपमेयं च भवति, तत्र अनन्वयनामालङ्कारः । तदुक्तं चन्द्रालोके–

**उपमानोपमेयत्वे यत्रैकस्यैव जागृतः ।**
**इन्दुरिन्दुरिवेत्यादौ–भवेदेवमनन्वयः ॥**
**(चन्द्रालोकः ५।१२)**

अर्थः– यत्र एकस्येव पदस्य उपमानम्, उपमेयं चेति उपमानोपमेये, तयोर्भावौ जागृतः स्फुटीभवतः, तत्र न अन्वयः, इति व्युत्पत्त्या अनन्वयनामकोऽलङ्कारो भवति । यथा– इन्दुः,इन्दुरिव वर्तते। अत्र एकमेव "इन्दु"पदम्, उपमानस्य उपमेयस्य च रूपेण प्रयुक्तम्।
यथा वा–

**गगनं गगनाकारं सागरः सागरोपमः ।**
**रामरावणयोर्युद्धं राम–रावणयोरिव ॥**

## (ग) रूपकम्

यत्र उपमेये उपमानस्यारोपो विधीयते, तत्रायमलङ्कारः, यथा चन्द्रालोके–

यत्रोपमानचित्रेण सर्वथाऽप्युपरज्यते ।
उपमेयमयी भित्तिस्तत्र रूपकमिष्यते ॥
(चन्द्रालोकः ५।१८)

अर्थः– यत्र उपमानरूपचित्रेण उपमेयरूपा भित्तिः उपरक्ता भवति, तत्र रूपकालङ्कारः । अत्रोदाहरणे उपमाने चित्रस्यारोपः, उपमेये भित्तेरारोपश्चेति रूपकम् ।

## (घ) उल्लेखः

कस्यापि वर्णनीयस्य (उपमेयस्य) बहुप्रकारेण वर्णनेऽयमलङ्कारो भवति । यथा–

बहुभिर्बहुधोल्लेखादेकस्योल्लेखिता मता ।
स्त्रीभिः कामः प्रियैश्चन्द्रः कालः शत्रुभिरैक्षि सः ॥
(चन्द्रालोकः ५।२३)

अर्थः– एकस्य वस्तुनो बहुभिर्जनैर्बहुप्रकारेण निर्देशनाद् उल्लीखिता उल्लेखालङ्कृतिर्मता अभिप्रेता । यथा—स वर्णनीयः (राजा) स्त्रीभिः काम इति, प्रियजनैश्चन्द्र इति, शत्रुभिः काल इति दृष्टः । अत्र एकस्य बहुभिर्बहुप्रकारेण वर्णन विहितम् ।

## (ङ) उत्प्रेक्षा

यत्र निषेधं विना उपमेये उपमानस्य सम्भावना क्रियते, तत्र, "उत्प्रेक्षा" नामकोऽलङ्कारः । चन्द्रालोके सोदाहरणं तत्स्वरूपं यथा—

उत्प्रेक्षोन्नीयते यत्र हेत्वादिर्निह्नुतिं विना ।
त्वन्मुखश्रीकृते नूनं पद्मैर्वैरायते शशी ॥
(चन्द्रालोकः ५।२६)

अर्थः– यत्र निह्नुतिं निषेधं विना हेत्वादि हेतुः फलं स्वरूपं वा उन्नीयते उत्कटकोटिसन्देहविषयीक्रियते, तत्र "उत्प्रेक्षा" ख्योऽलङ्कारः । यथा– शशी तव मुखशोभाप्राप्तये कमलैः सह वैरं करोति । अत्र चन्द्रस्य कमलैः सह वैरं किं कान्तामुखशोभालब्धये इति उत्प्रेक्षितम् ।

## (च) व्यतिरेकः

यस्मिन् काव्ये उपमानोपमेययोर्वैलक्षण्यं वर्ण्यते, तत्र व्यतिरेकः । यथा–

**व्यतिरेको विशेषश्चेदुपमानोपमेययोः ।**
**शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः ॥**
**(चन्द्रालोकः ५।५६)**

**अर्थः**– यत्र उपमानोपमेययोः विशेषो वैलक्षण्यं वर्ण्यते, तत्र व्यतिरेकः। यथा सन्तः शैला इव उन्नताः सन्ति, किन्तु प्रकृत्या कोमला भवन्ति। अत्र शैलानां सज्जनानां च औन्नत्ये साम्यं किन्तु उपमान शैलापेक्षया उपमेय सज्जनानां कोमलत्वमधिकमिति उपमानोपमेययोर्वैलक्षण्यप्रदर्शनाद् व्यतिरेकः ।

## (छ) विभावना

यत्र कारणं विना कार्यस्य उत्पत्तेर्वर्णनं क्रियते, तत्र विभावना। यथोक्तं चन्द्रालोके–

**विभावना विनापि स्यात् कारणं कार्यजन्म चेत् ।**
**पश्य लाक्षारसासिक्तं रक्तं त्वच्चरणद्वयम् ॥**
**(चन्द्रालोकः ५।७७)**

**अर्थः**–यदि कारणं विनापि कार्यस्य जन्म उत्पत्तिः वर्ण्यते, तदा विभावनालङ्कारः। यथा– लाक्षारसेन असिक्तमपि तव चरणद्वयं रक्तं वर्तते, पश्य। चरणद्वयस्य रक्ततासम्पादने कारणं लाक्षारसः, अत्र तु तद्विनैव रक्तता प्रदर्शितेति विभावना।

## (ज) विशेषोक्तिः

यत्र सत्यपि कारणे कार्यस्योत्पत्तिर्न प्रदर्श्यते, तत्र विशेषोक्तिः । यथोक्तम्–

**विशेषोक्तिरनुत्पत्तिः कार्यस्य सति कारणे ।**
**नमन्तमपि धीमन्तं न लङ्घयति कश्चन ॥**
**(चन्द्रालोकः ५।७८)**

**अर्थः**– कारणे सति कार्यस्य अनुत्पत्तिः विशेषोक्तिः। यथा– नम्रीभवन्तमपि धीमन्तं कश्चन न लङ्घयति । अत्र नमनरूपे कारणे सत्यपि लङ्घनरूपं कार्यं न प्रदर्शितमिति विशेषोक्तिः ।

## (झ) स्वभावोक्तिः

यत्र हरिण–बालकादीनां स्वभावस्य वर्णनं तत्र स्वभावोक्तिर्भवति। यथा–

**स्वभावोक्तिः स्वभावस्य जात्यादिषु च वर्णनम् ।**
**कुरङ्गैरुत्तरङ्गाक्षि स्तब्धकर्णैरुदीक्ष्यते ॥**
**(चन्द्रालोकः ५।११२)**

**अर्थः–** जात्यादिषु हरिणत्वादिषु सत्सु स्वभावस्य क्रियारूपादेर्यत् वर्णनं तत् स्वभावोक्तिः । यथा–हे उत्तरङ्गाक्षि, चञ्चलनेत्रे, स्तब्धकर्णैः निश्चलकर्णैः कुरङ्गैर्मृगैः उदीक्ष्यते । अत्र मृगजातेः स्वभाववर्णनं वर्तते इति स्वभावोक्तिः ।

### अभ्यासः

१. जयदेवमते कीदृशः शब्दः काव्यम् ?
२. काव्यस्य लक्षणं निर्दिशत ।
३. मम्मटः काव्येऽलङ्कारमपरिहार्यं मन्यते न वा ?
४. "अनलङ्कृती पुनः क्वापि" इत्युक्तवन्तं लक्ष्यीकृत्य जयदेवस्य कीदृशः प्रतिवादः ?
५. अलङ्कारशून्ययोः शब्दार्थयोः काव्यत्वं कथमलङ्कारमसम्भवम् ?
६. **अधोनिर्दिष्टश्लोकस्यार्थं प्रकाशयत**
   निर्दोषा लक्षणवती सरीतिर्गुणभूषणा ।
   सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक् ॥
७. शब्दः कः ? स च कतिविधः ?
८. रूढ–यौगिक–योगरूढशब्दानां परिचयो देयः ।
९. जयदेवस्य देशकालवृत्तीनां निर्देशः कार्यः ।
१०. चन्द्रालोके केषां विषयाणां निरूपणं कृतमस्ति ? संक्षेपेण निर्दिशत ।
११. अलङ्कारस्य किं स्वरूपम् ?
१२. को नाम शब्दालङ्कारः ?
१३. अर्थालङ्कारस्य किं लक्षणम् ? तस्योदाहरणञ्च प्रदर्शयत ।
१४. उपमायाः किं स्वरूपम् ?
१५. **अस्य श्लोकस्य व्याख्या कार्या**
   उपमानोपमेयत्वे यत्रैकस्यैव जागृतः ।
   इन्दुरिन्दुरिवेत्यादौ भवेदेवमनन्वयः ॥

१६. रूपकस्य किं स्वरूपम् ?

१७. उत्प्रेक्षाऽलङ्कारः कस्मिन् स्थाने भवति ? उदाहरणरूपे दर्शयत ।

१८. विभावना–विशेषोक्त्योः को भेदः ?

१९. अधस्तनोदाहरणेऽलङ्कारलक्षणं सङ्गमयत

कुरङ्गैरुत्तरङ्गाक्षि स्तब्धकर्णैरुदीक्ष्यते ।

# छन्दः

## गण—परिचयः

छन्दोज्ञानाय प्रथमतो गणानां ज्ञानमावश्यकम् ।

**गणा यथा–** यगणः, मगणः, नगणः, भगणः, जगणः, रगणः, सगणः, तगणश्चेति । त्रयो वर्णा मिलित्वा एको गणो भवति ।

**गणपरिचायकः श्लोको यथा**

**मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः ।**
**जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥**

**अर्थात् –**

| | गणसंकेतः | |
|---|---|---|
| त्रिगुरुः | SSS | मगणः । |
| त्रिलघुः | ||| | नगणः । |
| आदिगुरुः | S|| | भगणः । |
| आदिलघुः | |SS | यगणः । |
| मध्यगुरुः | |S| | जगणः । |
| लघुमध्यः | S|S | रगणः । |
| अन्तगुरुः | ||S | सगणः । |
| लघुवर्णः | | | लघुः (ल.) |
| गुरुवर्णः | S | गुरुः (ग.) |

## लघु–गुरुवर्णनियमाः

ह्रस्ववर्णः लघुः ( । ) भवति । दीर्घवर्णः, अनुस्वारयुक्तः, संयोगात् पूर्ववर्त्ती विसर्गयुक्तश्च वर्णो गुरुः ( S ) भवति । पादान्तो वर्णो विकल्पेन लघुर्गुरुर्वा भवति ।

**यथा–**

| | | | |
|---|---|---|---|
| सरस्वती | मया | दृष्टा | वीणापुस्तकधारिणी । |
| । S । S | । S | S S | S S S । । S । S |
| हंसवाहनसंयुक्ता | विद्यादानं | करोतु | मे ॥ |
| S । S । । S S S | S S S S | । S । | S |

## पद्यस्वरूपम्

पद्यस्य (श्लोकस्य) चतुर्थो भागः पाद उच्यते। पद्यं च द्विप्रकारकं वृत्तं भवति जातिश्चेति। वृत्तम् अक्षरसंख्यातम् जातिर्मात्रानिबद्धा भवति। अत्र प्रासङ्गिकतया केवलं केषाञ्चन वृत्तानां (छन्दसां) लक्षणोदाहरणानि प्रदर्श्यन्ते।

## अनुष्टुभ्

अस्मिन् छन्दसि प्रतिपादमष्टौ वर्णा भवन्ति। सर्वेषु पादेषु पंचममक्षरं लघु भवति। द्वितीयचतुर्थपादयोः सप्तमं लघुः, षष्ठं चाक्षरं गुरुर्भवति। वस्तुतस्तु अस्मिन् वृत्तेऽष्टाक्षरता, स्वाभाविकोच्चारणता च मुख्यनियमः।

**उदाहरणं यथा**

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥**

## इन्द्रवज्रा

यस्मिन् छन्दसि क्रमेण द्वौ तगणौ स्तः, एकः जगणोऽस्ति। तत्पश्चात् द्वौ गुरु भवतः, तत् इन्द्रवज्रा नाम छन्दः भवति।

| त | त | ज | ग | ग |
|---|---|---|---|---|
| ऽऽ। | ऽऽ। | ।ऽ। | ऽ | ऽ |

**स्यादिन्द्रवज्रा यदि तौ जगौ गः**

**उदाहरणं यथा**

**गोष्ठेगिरिं सत्यकरेण धृत्यारूष्टेन्द्रवज्राहतिमुक्तवृष्टौ।**
**यो गोकुलं गोपकुलञ्च सुस्थं चक्रे स नो रक्षतु चक्रपाणिः॥**

## उपेन्द्रवज्रा

इन्द्रवज्राया एव प्रतिपादं प्रथमे वर्णे लघौ सति उपेन्द्रवजा नाम वृत्तं भवति।

| ज | त | ज | ग | ग |
|---|---|---|---|---|
| ।ऽ। | ऽऽ। | ।ऽ। | ऽ | ऽ |

उपेन्द्रवज्रा प्रथमे लघौ सा।

उदाहरणं यथा

उपेन्द्र ! वज्रादिमणिच्छटाभिर्विभूषणानां छुरितं वपुस्त ।
स्मरामि गोपीभिरुपास्यमानं सुरद्रुमूले मणिमण्डपस्थम् ॥

## उपजातिः

यत्र पादौ इन्द्रवज्रोपेन्द्रवज्रयोः लक्षणयुक्तौ भवतः, तानि उपजातिनामानि वृत्तानि भवन्ति । इत्यमेव अन्यासु मिश्रितासु वृत्तद्वयलक्षयुक्तासु जातिषु इदमेव 'उपजातिः' इति नाम कथयन्ति । इन्द्रवज्रोपेन्द्रयोर्मिश्रणमुपजातिरिति संक्षेपः ।

यथा लक्षणम्

अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीया वुपजातयस्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥

उदाहरणं यथा

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥

## वंशस्थम्

यस्मिन् छन्दसि एकपादे क्रमेण जगणः, तगणः, जगणः, रगणश्चः भवन्ति, तद् वंशस्थं नाम वृत्तं भवति ।

| ज | त | ज | र |
|---|---|---|---|
| ISI | SSI | ISI | SIS |

जतौतु वंशस्थमुदीरितं जरौ ।

उदारहणं यथा

विलासवंशस्थविलं मुखानिलैः प्रपूर्य यः पंचमरागमुद्गिरन् ।
बृजाङ्गनानामपि गानशालिनां जहार मानं स हरिः पुनातु नः ॥

## वसन्ततिलका

यत्र प्रथमं तगणभगणौ भवतः, तत्पश्चात् जगणद्वयं भवति, पुनः द्वौ गुरू भवतः तत् वसन्ततिलकं नाम वृत्तं बोध्यम् ।

| त | भ | ज | ज | ग | ग |
|---|---|---|---|---|---|
| SSI | SII | ISI | ISI | S | S |

ज्ञेयं वसन्ततिलकं तभजा जगौ गः ।

उदाहरणं यथा

फुल्लं वसन्ततिलकं तिलकं वनाल्या लीलापरं पिककुलं कलमत्र रौति ।
वात्येष पुष्पसुरभिर्मलयाद्रिवातो यातो हरिः स मथुरा, विधिनां हताःस्मः ॥

अभ्यासः

१. छन्दः शास्त्रे गणानां परिचयो देयः ।
२. कः ह्रस्ववर्णस्य संकेतः ?
३. कः दीर्घवर्णस्य संकेतः ?
४. पद्यस्य किं स्वरूपम् ?
५. अनुष्टुभ् छन्दसः किं लक्षणम् ?
६. इन्द्रवज्रायाः किं लक्षणं तस्योदाहरणञ्च प्रदर्शयत ।
७. उपजातिवृत्तस्य किं स्वरूपम् ?
८. वंशस्थछन्दसः, उदाहरणं प्रदर्शयत ।
९. वसन्ततिलकस्य लक्षणमुदाहरणञ्च लिखत ।

# हितोपदेशः

**सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः ।**
**जान्हवीफेनलेखेव यन्मूर्ध्नि शशिनः कला ॥१॥**

**अन्वयः–** तस्य, धूर्जटेः, प्रसादात्, सताम्, साध्ये, सिद्धिः, अस्तु, यन्मूर्ध्नि, शशिनः कला, जाह्नवीफेनलेखा इव, (शोभते)।

**व्याख्याः–** सिद्धिरिति। तस्य धूर्जटेः=शिवस्य, प्रसादात्=अनुकम्पातः, सताम्=सज्जनानाम्, साध्ये = कर्मणि, सिद्धिः = स्वाभीष्टलाभः, अस्तु = भवतु, यस्य= शङ्करस्य, मूर्ध्नि = मस्तके, जाह्नवीफेनलेखा = जाह्नव्याः गंगायाः फेनः जलकफः, "डिण्डीरोऽब्धिकफः फेनः" इत्यमरः तस्य लेखा=रेखा इव, शशिनः=चन्द्रस्य कला= षोडशो भागः, "कलातु षोडशो भागः" इत्यमरः शोभते ।

**श्रुतो हितो पदेशोऽयं पाटवं संस्कृतोक्तिषु ।**
**वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥२॥**

**अन्वयः–** अयं, हितोपदेशः, श्रुतः, (सन्) संस्कृतोक्तिषु, पाटवं, ददाति, सर्वत्र वाचां, वैचित्र्यं, नीतिविद्यां, च ददाति ।

**व्याख्याः–** श्रुत इति। श्रुतः= अधीतः, ख्यातः प्रसिद्धो वेत्यर्थः। अयम्=एषः, हितोपदेशः = हितः हितकरः, उपदेशः = शिक्षा यत्र स हितोपदेशनामको ग्रन्थविशेषः, संस्कृतोक्तिषु = देवभाषाभाषणेषु, पाटवम् = चातुर्यम्, ददाति। च = पुनः, सर्वत्र= सर्वस्मिन् कार्ये व्यवहारे वा वाचां, वैचियभ्म् = वचनकौशलम्, ददाति, नीतिविद्याम्,= नीतेः विद्या नीति विद्या ताम् = नीतिशास्त्रज्ञानं च ददाति ।

**अजरामरवत्प्राज्ञो विद्यामर्थं च चिन्तयेत् ।**
**गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥३॥**

**अन्वयः–** प्राज्ञः, अजरामरवत्, विद्याम्, अर्थं च चिन्तयेत्। मृत्युना, केशेषु गृहीत, इव धर्मम्, आचरेत् ।

**व्याख्याः–** अजरेति । प्राज्ञः = पण्डितः, अजरामरवत् = जरामरणरहित इव, विद्याम्=शास्त्रकला दिज्ञानम्, अर्थम् च=धनम् च, चिन्तयेत्=विचारयेत्, विद्यामभ्यस्येत्,

धनञ्चोपार्जयेदित्यर्थः। मृत्युना = यमेन, केशेषु = मूर्धजेषु, गृहीत इव = आकृष्ट इव, धर्मम् = पुण्यम्, आचरेत् = अनुतिष्ठेत् ।

**सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।**
**अहार्य्यत्वादनर्घत्वादक्षयत्वाच्च सर्वदा ॥४॥**

**अन्वयः**– (विद्वांसः) सर्वदा, अहार्य्यत्वात्, अनर्घत्वात्, अक्षयत्वात् च विद्या, एव, सर्वद्रव्येषु, अनुत्तमं द्रव्यम्, (इति), आहुः ।

**व्याख्याः**– सर्वद्रव्येष्विति । विद्वांसः सर्वदा=सदा, अहार्यत्वात्=हर्तुमशक्यत्वात्, अनर्घत्वात्=मूल्येनापि लब्धुमशक्यत्वात्, अक्षयत्वात् च = नाशरहितत्वात् च, सर्वद्रव्येषु = सर्ववस्तुषु, विद्यैव=शास्त्रज्ञानमेव, अनुत्तमम् = नास्ति उत्तमो यस्मात् तत् उत्कृष्टम् श्रेष्ठमित्यर्थः, द्रव्यम्=धनम्, इति आहुः = वदन्ति ।

**संयोजयति विद्यैव नीचगाऽपि नरं सरित् ।**
**समुद्रमिव दुर्धर्षं नृपं भाग्यमतः परम् ॥५॥**

**अन्वयः**– नीचगा, अपि, सरित्, दुर्धर्षं, समुद्रम्, इव (नीचगा अपि) विद्या, एव नरं, दुर्धर्षं, नृपं, संयोजयति, अतः, परम्, भाग्यम् ।

**व्याख्याः**– संयोजयतीति । नीचगा अपि = निम्नदेशगामिनी अपि, सरित्=नदी, दुर्धर्षम् = दुष्प्रापम्, समुद्रमिव = अर्णवमिव, नीचगा अपि, विद्या=नीचजनास्थिताऽपि विद्या एव, नरम् = पुरुषम्, दुर्धर्षम् = दुरतिक्रमम्, नृपम् = राजानम् संयोजयति = संगमयति। अतः=अस्मात्, परम्=अनन्तरम् नरस्य भाग्यम् दैवश्च संयोजयति। विद्यैव दुर्गम्यं राजानं दर्शयित्वा ततो विदुषे धनलाभयोगं विदधातीति भावः ।

**विद्या ददाति विनयं विनयाद् याति पात्रताम् ।**
**पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥६॥**

**अन्वयः**– विद्या, (नराय) विनयं, ददाति । विनयात्, (नरः) पात्रतां याति, पात्रत्वात्, धनम्, आप्नोति, धनात्, धर्मम् (आप्नोति), ततः, सुखम् (आप्नोति)।

**व्याख्या**– विद्येति। विद्या = शास्त्रादिज्ञानम्, (नराय) विनयम् = नम्रताम्, ददाति । विनयात् = नम्रतया (विनययुक्तः पुरुषः), पात्रताम् = सज्जनताम्, याति= प्राप्नोति पात्रत्वात् = योग्यत्वात्, धनमाप्नोति = धनं लभते, धनात् धर्मम् = पुण्यम् आप्नोति, ततः = धर्मात् सुखमाप्नोति। सकलाभीष्टमूलं विद्यैवेति तात्पर्यम् ।

**विद्या शस्त्रञ्च शास्त्रञ्च द्वे विद्ये प्रतिपत्तये ।**
**आद्या हास्याय वृद्धत्वं द्वितीयाऽऽद्रियते सदा ॥७॥**

**अन्वयः**– शस्त्रं शास्त्रं च विद्या, द्वे विद्ये, प्रतिपत्तये (भवतः) । (तयोः) आद्या वृद्धत्वे, हास्याय (भवति), द्वितीया सदा (जनैः) आद्रियते ।

**व्याख्याः**– विद्येति । शस्त्रञ्च=खड्गादिचालनं च, शास्त्रञ्च=वेदादे अध्ययनं च (इति) विद्या =वेत्ति अनया इति विद्या, द्वे अपि विद्ये=उक्तरूपे, प्रतिपत्तये= यशोलाभाय, ज्ञानप्राप्तये च भवतः, किन्तु (तयोः) आद्या = शस्त्रविद्या, वृद्धत्वे = वृद्धावस्थायाम्, वले नष्टे सतीत्यर्थ. । हास्याय = उपहासाय भवतीति शेषः, द्वितीया = शास्त्रविद्या वेदव्याकरणादिज्ञानम्, सदासर्वस्मिन काले, आद्रियते = पूज्यते जनैरिति शेषः । अतः शस्त्रविद्यापेक्षया शास्त्रविद्या उत्तमा ।

**यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् ॥**
**कथाच्छलेन बालानां नीतिस्तदिह कथ्यते ॥८॥**

**अन्वयः**– यत् नवे, भाजने लग्नः, संस्कारः, अन्यथा न भवेत् । तत् इह, कथाच्छलेन बालानां नीतिः कथ्यते ।

**व्याख्याः**– यदिति । यत् =यस्मात् हेतोः, यथा वा नवे=नवीने आर्द्रे वा। भाजने= भाण्डे, बाले च लग्नः=संसक्तः, संस्कारः=रेखादिकम्, विद्यादिसंस्कारश्च, अन्यथा विपरीतो, न भवेत् =न स्यात्, तत् तस्मात् कारणात्, तथा वा इह=अस्मिन् हितोपदेशे, कथाच्छलेन=कथा एव छलं व्याजस्तेन=उपाख्यानव्याजेन, बालानाम् = शिशूनाम्, नीतिः=राजनीतिः, लोकनीतिश्च, कथ्यते=उपदिश्यते ।

**मित्रलाभः सुहृद्‌भेदो विग्रहः सन्धिरेव च ।**
**पंचतन्त्रात्तथाऽन्यस्माद् ग्रन्थादाकृष्य लिख्यते ॥९॥**

**अन्वयः**– पंचतन्त्रात्, तथा अन्यस्मात् ग्रन्थात्, आकृष्य, मित्रलाभः, सुहृद्‌भेदः, विग्रहः, सन्धिः एव च लिख्यते ।

**व्याख्याः**– मित्रेति । पंचतन्त्रात् =पंचानां तन्त्राणां समाहारः इति, तन्नामकग्रन्थ-विशेषः, तस्मात्, तथा च अन्यस्मात् =परस्मात्, ग्रन्थात्=वृहत्कथाकामन्दकीयादिनीति-ग्रन्थान्तरात्, आकृष्य=समादाय संक्षिप्य च, मित्रलाभः=मित्रस्य लाभः=प्राप्तिः यत्र सः, सुहृद्‌भेदः=सुहृदः भेदः=विरोधी यत्र सः, विग्रहः=युद्धम्, सन्धिः=मेलनञ्च, इति प्रसिद्धं प्रकरणचतुष्कम्, लिख्यते=विरच्यते ।

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम् । तत्र सवस्वामिगुणोपेतः सुदर्शनो नाम नरपतिरासीत् । स भूपतिरेकदा केनापि पठ्यमानं श्लोकद्वयं शुश्राव ।

**व्याख्याः–** अस्तीति । भागीरथीतीरे=भागीरथीतटे, पाटलिपुत्रनामधेयम्=नाम एव नामधेयम्– पाटलिपुत्रम् इति नामधेयं यस्य तत् पाटलिपुत्रनामकम्=इदानी पटना इति प्रसिद्ध नगरम्=पुरम्, अस्ति=विद्यते। तत्र पाटलिपुत्रे, सर्वस्वामिगुणोपेतः=स्वामिनः गुणाः स्वामिगुणाः–प्रजापालकत्वं शौर्यादयश्च सर्वे च ते स्वामिगुणाश्च इति सर्वस्वामिगुणाः, तैः उपेतः= युक्तः, सुदर्शनो नाम=तन्नामकः, नरपति =राजा, आसीत्=अभूत् । स भूपतिः=राजा सुदर्शनः, एकदा=एकस्मिन् काले, केनापि=अपरिचितेन, पठ्यमानम्=अधीयमानम्, श्लोकद्वयम्=पद्यद्वयम्, शुश्राव=आकर्णितवान् ।

**अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।**
**सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥१०॥**

**अन्वयः–** अनेकसंशयोच्छेदि, परोक्षार्थस्य, दर्शकं, शास्त्रं, सर्वस्य लोचनं (भवति)। (तत्) यस्य, नास्ति, सः अन्धः एव ।

**व्याख्याः–** अनेकेति । अनेकसंशयोच्छेदि=अनेकान्=संशयान् उच्छिनत्ति तच्छीलमिति अनेकसंशयोच्छेदि=बहुविधसंदेहनिवर्तकम्, परोक्षार्थस्य=भूतभविष्यार्थस्य, दर्शकम्=ज्ञापकम्, शास्त्रम्=वेदव्याकरणज्योतिषादिकम्, सर्वस्य=सम्पूर्णस्य लोकस्य, लोचनम्=चक्षु भवति । तच्छास्त्रं यस्य मनुष्यस्य सविधे नास्ति सः अन्ध एव=नेत्ररहित एव ।

**यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता ।**
**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥११॥**

**अन्वयः–** यौवनं, धनसम्पत्तिः, प्रभुत्वम्, अविवेकिता (एषां मध्ये) एकैकमपि अनर्थाय (भवति), यत्र चतुष्टयम् (तत्र) किमु ।

**व्याख्याः–** यौवनमिति । यौवनम्=युवावस्था, धनसम्पत्तिः=धनप्राचुर्यम्, प्रभुत्वम्=प्रभोर्भावः प्रभुत्वम्=स्वामित्वम्, अविवेकिता=विचारशून्यता, च एषां वस्तूनां मध्ये एकैकमपि=प्रत्येकमपि, अनर्थाय=विपत्तये, भवति । यत्र यस्मिन् मनुष्ये चतुष्टयम्=चतुष्कम् भवति, तत्र किमु ? = का कथा ? ।

इत्याकर्ण्याऽऽत्मनः पुत्राणामनधिगतशास्त्राणां नित्यमुन्मार्गगामिनां शास्त्राऽननुष्ठानेनोद्विग्नमनाः स राजा चिन्तयामास ।

**व्याख्याः–** इतीति । इति=पूर्वोक्तश्लोकद्वयम्, आकर्ण्य=श्रुत्वा, आत्मनः=स्वस्य, पुत्राणाम्=पुन्नामनरकात् त्रायन्ते इति पुत्राः, तेषाम्, अनधिगतशास्त्राणाम्=न अधिगतं

शास्त्रं यैस्ते अनधिगतशास्त्रास्तेषां=शास्त्राध्ययनरहितानाम्, नित्यम्=सर्वदा,उन्मार्गगामिनाम्=उन्मार्गे गच्छन्तीति उन्मार्गगामिनः तेषाम् दुर्व्यसनासक्तानाम्, शास्त्राऽननुष्ठानेन=शास्त्रस्य कर्तव्य कर्मणः, अध्ययनादेः वा अनुष्ठानम्=अनभ्यासस्तेन, उद्विग्नमनाः=उद्विग्नम्=अशान्तम् मनो यस्य सः, व्याकुलात्मा, सः=सुदर्शनो नाम, राजा=नरपतिः, वक्ष्यमाणप्रकारेण चिन्तयामास=विचारयामास।

**कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः।**
**काणेन चक्षुषा किं वा चक्षुः पीडैव केवलम् ॥१२॥**

**अन्वयः**– यः, न विद्वान्, न धार्मिकः (अस्ति), जातेन पुत्रेण कः अर्थः ? । वा काणेन, चक्षुषा, किं (फलं भवति) ? केवलम्, चक्षुः पीडा एव।

**व्याख्याः**– कोऽर्थ इति। यः=पुत्रः, न विद्वान्=न पण्डितः, धार्मिको न=धर्माचरणशीलो न (अस्ति), एवंभूतेन जातेन=उत्पन्ने पुत्रेण, कः अर्थः=किंन प्रयोजनम् ? वा, यद्वा काणेन=दर्शनसामर्थ्यहीनेन, चक्षुषा=नेत्रेण, किम् ?=किं फलं भवति? केवलम्=एकम् चक्षुः पीडा=चक्षुषः पीडा चक्षुः पीडा एव=नेत्रवेदना एव जायते। केवलं चक्षुः पीडाजनकमेव भवतीति भावः।

**अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः।**
**सकृद् दुःखकरावाद्यावन्तिमस्तु पदे पदे ॥१३॥**

**अन्वयः**– अजातमृतमूर्खाणाम्, आद्यौ, वरम्, च, अन्तिमः, न (वरम्)। आद्यौ, सकृत्, दुःखकरौ, अन्तिम, तु पदे पदे (दुःखकरः भवति)।

**व्याख्याः**–अजातेति। अजातमृतमूर्खाणाम्=न जातः अजातः=अनुत्पन्नः,मृतः=उत्पन्नः सन् तत्क्षण एव पञ्चत्वं गतः, मूर्खः=सदसद्विवेकरहितः, एषां मध्ये, आद्यौ=अजातमृतौ, वरम्=ईषत्प्रियौ च=पुनः, अन्तिमः=मूर्खः न वरम्। कुतः आद्यौ=अजातमृतौ, सकृददुःखकरौ=एकवारमेव दुःखजनकौ, अन्तिमस्तु=मूर्खस्तु, पदे पदे=सर्वदैव दुःखकरः भवति।

**स जातो येन जातेन याति वंशः समुन्नतिम्।**
**परिवर्तिनि संसारे मृतः को वा न जायते ? ॥१४॥**

**अन्वयः**– येन, जातेन, वंशः, समुन्नतिम्, याति, स, जातः,। परिवर्तिनि संसारे मृतः को वा न जायते ?

**व्याख्याः**– स इति। येन=पुत्रेण,जातेन=उत्पन्नेन सता, वंशः=कुलम्, समुन्नतिं=सम्यक् उन्नतिम्,=ख्यातिम्, याति=प्राप्नोति, सः=पुत्रः, जातः=उत्पन्नः मन्यते। परि

र्वतिनि=परिवर्तनशीले, संसारे=जगति, मृतः=मृत्युखप्रविष्टः, इह लोकं परित्यज्येति यावत् । को वा न जायते ?=न उत्पद्यते ?, बहव प्राणिनः उत्पद्यन्ते विलीयन्ते च । स एव पुण्यजन्मा येन उत्पन्नेन कुलं पूज्यत इति भावः ।

**गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद्यस्य ।**
**तेनाम्बा यदि सुतिनी वद बन्ध्या कीदृशी भवति? ।। १५।।**

**अन्वयः**– गुणिगणगणनारम्भे, यस्य, कठिनी, ससम्भ्रमात्, न पतति, तेन, अम्बा, यदि सुतिनी, तर्हि बन्ध्या, कीदृशी भवति ? (इति) वद ।

**व्याख्याः**– गुणीहि । गुणिगणगणनारम्भे=गुणिनां पण्डितानां गणाः=समुदायाः तेषां गणना=संख्यानम् , तस्या आरम्भे=आदौ, यस्य=पुंसः, कठिनी=लेखसाधिका, कनिष्ठिका वा ससम्भ्रमात्=सगौरवात्, न पतति=तन्नामोल्लेखनार्थं शीघ्रमुपयुक्ता न भवति, तेन=गुणरहितेन पुत्रेण, अम्बा=माता, यदि, सुतिनी=पुत्रवती, चेत्=तर्हि, वन्ध्या=अजातपुत्रा, कीदृशी=का भवति? इति=एतत्, वद=कथय ।

**दाने तपसि शौर्य्ये च यस्य न प्रथितं मनः ।**
**विद्यायामर्थलाभे च मातुरुच्चार एव स ।।१६।।**

**अन्वयः**– यस्य, मनः, दाने, तपसि, शौर्ये, विद्यायाम्, अर्थलाभे, च, न, प्रथितं, स, मातुः उच्चार एव ।

**व्याख्याः**– दान इति । यस्य मनः=चित्तम्, दाने=परोद्देश्येन त्यागे, तपसि=तपस्यायाम्, शौर्ये=वीरोचितकार्ये, विद्यायाम्=विद्योपार्जने, अर्थलाभे=धनार्जने, च न प्रथितम्=न संसक्तं न संम्पृक्तमिति यावत्, स मातुः=जनन्याः उच्चार एव विष्ठैवेत्यर्थः ।

**वरमेको गुणी पुत्रो न च मूर्खशतान्यपि ।**
**एकश्चन्द्रस्तमो हन्ति न च तारागणोऽपि च ।।१७।।**

**अन्वयः**– एकः, गुणी, पुत्रः, वरम्, मूर्खशतानि, अपि, च न (वरम्) । एकः, चन्द्रः, तमः, हन्ति, तारागणः अपि, च न ।

**व्याख्याः**– वरमिति । एकः=एकाकी, गुणी=विद्वान्, ख्यातयशाः, पुत्रः वरम्=श्रेष्ठः, मूर्खशतान्यपि=मूर्खाणां शतान्यपि, न च=नैव वरमिति यावत् । यतः असहाय एकः=चन्द्रःनिशापतिः, तमः=अन्धकारम्, हन्ति=नाशयति, तारागणः=नक्षत्रमूह अपि, न च=नैवान्ध कारविनाशे समर्थो भवतीत्यर्थः ।

**पुण्यतीर्थे कृतं येन तपः क्वाऽप्यतिदुष्करम् ।**
**तस्य पुत्रो भवेद्वश्यः समृद्धो धार्मिकः सुधीः ॥१८॥**

**अन्वयः**– येन, क्वा अपि पुण्यतीर्थे, अति दुष्करं, तपः, कृतं, तस्य, पुत्रः, समृद्धः, धार्मिकः, सुधीः, वश्यः (च) भवेत्।

**व्याख्याः**– पुण्येति। येन=पुरुषेण, क्वाऽपि=कुत्रापि, पुण्यतीर्थे = पवित्रक्षेत्रे, अतिदुष्करम्=अतिकठिनम्, तपः=धर्मानुष्ठानम्, कृतम्=अनुष्ठितम्, तस्य=प्रागुक्तस्य पुंस पुत्रः=तनयः, समृद्धः=धनादियुक्तः, धार्मिकः=धर्मशीलः, सुधी.=पण्डितः, वश्यः=आज्ञाकारी च भवेत्=स्यात् ।

**अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च ।**
**वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकेषु सुखानि राजन् ॥१९॥**

**अन्वयः**– नित्यम् अर्थागमः,(नित्यम्), अरोगिता, च, प्रिया, प्रियवादिनी, च, भार्याः वश्यः पुत्रः, च, अर्थकरी, विद्या, च (हे) राजन्। (इमानि) षट् जीवलोकेषु, सुखानि।

**व्याख्याः**– अर्थेति। नित्यम्=सर्वस्मिन् काले, अर्थागमः=अर्थस्य धनस्य आगमः=प्राप्तिः, नित्यम् अरोगिता=रोगाभावः, प्रिया= प्रीतियुक्ता,प्रियवादिनी=मधुरभाषिणी, च, भार्या=स्त्री, वश्यः=वशे भवः वश्यः=आज्ञाकारी,पुत्रः=तनयः, अर्थकरी=धनदात्री विद्या च हे राजन् एतानि षट् जीवलोकेषु=जगत्सु, सुखानि=सुखजनकानि भवन्ति।

**को धन्यो बहुभिः पुत्रैः कुशूलापूरणाऽऽढकैः ।**
**वरमेकः कुलालम्बी यत्र विश्रूयते पिता ॥२०॥**

**अन्वयः**– कुशूलापूरणाढकैः, (इव) बहुभिः, पुत्रैः, कः, धन्यः, (भवति)? (किन्तु) कुलालम्बी, एकः (अपि पुत्रः) वरम् (अस्ति), यत्र पिता विश्रूयते।

**व्याख्याः**– क इति। कुशूलापूरणाढकैः=कुशूलैः=तुषैः आसमन्तात् पूरणाः इति कुशूलापूरणाः कुशूलापूरणाश्च ते आढकाश्च इति कुशूलापुरणाढकाः तैः=तुषपूर्णधान्यपात्रैः, इव बहुभिः=अनेकैः, पुत्रैः=सुतैः, क=कः पुत्रवान्, धन्यः=कृतकृत्यः, भवति? किन्तु= कुलालम्बी =कुलम् आलम्बते इति कुलालम्बी–वंशप्रकाशकः, एकः=एकाकी पुत्रः अपि वरम्=श्रेष्ठोऽस्ति, यत्र=यस्मिन् येन पुत्रेण पिता =जनकः, विश्रूयते=ख्यातो भवति।

**यस्य कस्य प्रसूतोऽपि गुणवान् पूज्यते नरः ।**
**धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति ॥२१॥**

**अन्वयः**– गुणवान्, नरः, यस्य कस्य, अपि प्रसूतः, (जनैः) पूज्यते, निर्गुणः, वंशविशुद्धः, अपि धनुः, (इव) किं करिष्यति ?

**व्याख्याः**– यस्येति। गुणवान् = गुणयुक्तः, नरः = पुरुषः, यस्य कस्य=महतः अल्पीयसः वा वंशस्य=उच्चवंशरहितस्यापीत्यर्थः, प्रसूतः=उत्पन्नः, पूज्यते=मह्यते । निर्गुणः=गुणरहितः, वंशविशुद्धोऽपि=शुद्धकुलोत्पन्नोऽपि, पुत्रः, धनुः=चापः, इव किं करिष्यति ?=शत्रुमारणादिकं कार्यं न करिष्यतीत्यर्थः। उच्चवंशजोऽपि निर्गुणः विनयादिगुणरहितः पुरुषः, शुद्धवंशरचितमपि प्रत्यञ्चारहितं धनुरिव किं करिष्यति ? नकिमपीति भावः ।

**हा हा पुत्रक ! नाधीतं गतास्वेतासु रात्रिषु ।**
**तेन त्वं विदुषां मध्ये पङ्के गौरिव सीदसि ॥२२॥**

**अन्वयः**– हा हा, पुत्रक!, एतासु, गतासु, रात्रिषु, (त्वया) न अधीतम्, तेन त्वं विदुषां, मध्ये, पङ्के, गौ, इव, सीदसि ।

**व्याख्याः**– हेति। हा हा इति खेदसूचकमव्ययम् हे पुत्रक ! अत्र स्वार्थिकः, कप्रत्ययः, हे पुत्र इत्यर्थः। गतासु=व्यतीतासु, एतासु=आसु, रात्रिषु=रजनीषु, त्वया न अधीतम्=न शास्त्रमभ्यस्तम्, तेन=कारणेन, त्वं विदुषाम्=पण्डितानाम्, मध्ये=सभायाम्, पङ्के=कर्दमे, गौरिव=गोवत्, सीदसि=दुःखीभवतीत्यर्थः ।

**तत्कथमिदानीमेते मम पुत्रा गुणवन्तः क्रियन्ताम् ? यतः**

**व्याख्याः**– तदिति । तत्=तस्मात् कारणात्, इदानीम्=एतस्मिन् काले, एते=इमे मम पुत्राः=मत्सुताः, कथम्=केन प्रकारेण, गुणवन्तः=गुणयुक्ताः, क्रियन्ताम्=सम्पाद्यन्ताम्, यतः=यस्माद्धेतोः–

**आहारनिद्राभयमैथुनञ्च सामान्यमेतत्पशुभिर्नराणाम् ।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥२३॥**

**अन्वयः**– आहारनिद्राभयमैथुनम्, एतत्, च नराणां, पशुभिः, सामान्यम् । तेषाम्, धर्मः, हि, अधिकः विशेषः, धर्मेण, हीनाः, (नराः) पशुभिः, समानाः, (भवन्ति) ।

**व्याख्याः**–आहारेति । नराणाम्=मनुष्याणाम्, आहारनिद्राभयमैथुनञ्च=आहारश्च निद्रा च भयं च मैथुनं चेत्यतेषां समाहारद्वन्द्वः, भोजननिद्रा भयसुरतमेतश्चतुष्टयम्, पशुभिः=अश्वादिभिः, सामान्यम्=तुल्यम्, किन्तु तेषां मनुष्याणाम्, धर्मो हि=धर्म एव, अधिकः विशेषः=परम्,भेदकः=व्यार्वतक इति यावत्। धर्मेण हीनाः=धर्मरहिताः नराः, पशुभिः समानाः=पशुकल्पा एव भवन्तीति भावः ।

**धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते ।।**
**अजागलस्तनस्येव तस्य जन्म निरर्थकम् ।।२४।।**

**अन्वय:**– धर्मार्थकाममोक्षाणाम्, एक:, अपि, यस्य, विद्यते, तस्य जन्म अजागलस्तनस्य (जन्म) इव, निरर्थकं (भवति) ।

**व्याख्या:**– धर्मेति । यस्य =पुरुषस्य, धर्मार्थकाममोक्षाणां =धर्मश्च अर्थश्च कामश्च मोक्षश्च तेषां =चतुर्णा पुरुषार्थानां मध्ये, एकोऽपि पुरुषार्थ: =धर्मादि:, न विद्यते =नास्ति, तस्य =धर्मादिहीनस्य पुंस:, जन्म अजागलस्तनस्य इव =अजाया: गलस्य =कण्ठस्य स्तनस्य इव लम्बमानं स्तनाकारचर्मखण्डमिव, जन्म =उत्पत्ति:, निरर्थकम्, निष्फलं भवतीत्यर्थ: ।

**आयु: कर्म च वित्तं च विद्या निधनमेव च ।**
**पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिन: ।।२५।।**

**अन्वय:**– आयु:, कर्म, च विद्या, निधनम्, एव च, एतानि पञ्च, अपि, गर्भस्थस्य एव देहिन:, सृज्यन्ते ।

**व्याख्या:**– आयुरिती । आयु: =जीवनकाल:, वय: इत्यर्थ:, कर्म =मरणपर्यन्तशुभाशुभानामाचरणञ्च, वित्तम् =धनादि च, विद्या =शास्त्राद्यभ्यास:, निधनम् =मृत्यु:, एव च एतानि पञ्च =आयुरादीनि पञ्चसंख्यकानि, गर्भस्थस्यैव =मातृगर्भस्थितस्यैव, देहिन: =प्राणिन:, सृज्यन्ते =निर्मीयन्ते । प्राणी एतै: सहैव जन्म लभत इत्यर्थ: ।

**अवश्यम्भाविनो भावा भवन्ति महतामपि ।**
**नग्नत्वं नीलकण्ठस्य महाऽहिशयनं हरे: ।।२६।।**

**अन्वय:**– महताम्, अपि अवश्यम्भाविन:, भावा:, भवन्ति । नीलकण्ठस्य, नग्नत्वं, हरे: महाहिशयनम्, (च अत्र, निदर्शनम्) ।

**व्याख्या:**– अवश्यमिति । महतामपि =उत्तमानां नृपाणां देवानामपि, अवश्यम्भाविन: =अवश्यमेव भवितव्या:, भावा: =सुखदु:खादयो विषया:, भवन्ति =आपतन्ति । दृष्टान्तेनोपपादयति नीलकण्ठस्य =सर्वेश्वरस्य शिवस्य, नग्नत्वम् =दिगम्बरत्वम्, हरे: =त्रिलोकीनाथस्य विष्णो: महाहिशयनम् =शेषशैय्या एवात्र निदर्शमिति भाव: ।

**यदभावि न तद्भावि भावि चेन्न तदन्यथा ।**
**इति चिन्ताविषघ्नोऽयमगद: किं न पीयते ?।।२७।।**

**अन्वयः**– यत्, अभावि, तत्, न भावि, यत्, भावि, चेत् तत्, अन्यथा न (भवति), इति, अयं, चिन्ताविषघ्नः, अगदः, किं न पीयते ? ।

**व्याख्या**:– यदिति। यत् =किमपि सुखदुःखादिः,अभावि =न भावि अभावि = भविष्यत्कालेऽपि असम्भवि, तत् =तदसंभवसुखादि, न भावि =न भविष्यत्येव, यत् =सुखादि भावि =भविष्यत्येव चेत् तत् =भाविसुखादि, अन्यथा न =विपरीत दूरीकर्तुं वा न शक्यते, इति =अतः अयम् =एषः, चिन्ताविषघ्नः =चिन्तारूपविषापहारकः, अगदः =औषधम्, किम् =कथं न पीयते ? =न सेव्यते ?

**एतत् कार्याक्षमाणां केषाञ्चिदालस्यवचनम् ।**

एतत् =इदम्, कार्याक्षमाणाम् =परिश्रमसाध्यकार्ये असमर्थानाम्, केषाञ्चित् = पुरुषाणाम्, आलस्यवचनम् =आलस्येनोदीरितं वचनम् ।

**न दैवमपि सञ्चिन्त्य त्यजेदुद्योगमात्मनः ।**
**अनुद्योगेन तैलानि तिलेभ्यो नाऽप्तुमर्हति ।। ।।२८।।**

**अन्वयः**– (जनः) दैवम्, इति, सञ्चिन्त्य, आत्मनः, उद्योगं, न त्यजेत् । यतः (जनः) अनुद्योगेन, तिलेभ्यः, तैलानि, आप्तुं, न अर्हति ।

**व्याख्या**:– नेति । जनः दैवम् =भाग्यम्, "दैवे यत् करिष्यति, तदेव भविष्यति, अहं किं करिष्यामि ?" इति =एवम्, सञ्चिन्त्य =विचार्य, आत्मनः =स्वस्य, उद्योगम् = व्यापारम् न त्यजेत् =न मुञ्चेत् । यतः जनः अनुद्योगेन उद्योगं विना तिलेभ्यः =तिलाख्यान्नेभ्यः, तैलानि =स्नेहम्, आप्तुम् =प्राप्तुम्, न अर्हति =न समर्थो भवति ।

**उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेनदेयमिति कापुरुषा वदन्ति ।**
**दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः।।२९।।**

**अन्वयः**– उद्योगिनं, पुरुषसिंहं, लक्ष्मीः, उपैति, दैवेन, देयम्, इति, कापुरुषाः, वदन्ति । (अतः) दैवं, निहत्य, आत्मशक्त्या, पौरुषं कुरु, यत्ने कृते, (अपि) यदि, (कार्यम्) न सिध्यति, (तदा) अत्र कः दोषः ? (इति चिन्तय) ।

**व्याख्या**:– उद्योगिनमिति । उद्योगिनम् =यत्नवन्तम्, पुरुषसिंहम् =सिंहवत् विक्रमशालिनं पुरुषप्रधानम्, लक्ष्मीः =धनसम्पत्तिः, उपैति =स्वयमेव वृणुते । दैवेन =भाग्येन सर्ववस्तु देयम् =सम्पादनीयमिति, कापुरुषाः =कुत्सिताः पुरुषाः, सामर्थ्यहीनाः कातरा वा, वदन्ति =कथयन्ति, (अतः) दैवं =भाग्यम्, निहत्य =अनादृत्य, आत्मशक्त्या =स्वसा-

मथ्यन, पौरुषम् =यत्नम्, उद्योगम् कुरू=विधेहि अथ यत्ने=व्यापारे, कृते=विहिते, सति, अपि यदि कार्यं न सिध्यति तर्हि अत्र = अस्मिन् यत्ने कः दोषः इति चिन्तय ।

**यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ॥**
**एवं पुरुषकारेण विना दैवं न सिध्यति ॥३०॥**

अन्वयः– यथा, हि, चक्रेण, रथस्य, गतिः, न भवेत्, एवं, पुरुषकारेण, विना दैवं, न सिध्यति ।

व्याख्याः– यथेति । यथा=यद्वत् एकेन=असहायेन, चक्रेण=रथांगेन, रथस्य=स्यन्दनस्य, गतिः=गमनम्, न भवेत्=न स्यात्, एवम्=तद्वत् पुरुषकारेण विना=उद्योगमृते, दैवम्=भाग्यम्, न सिध्यति=न फलति

**पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते ॥**
**तस्मात् पुरुषकारेण यत्नं कुर्यादतन्द्रितः ॥३१॥**

अन्वयः– यत् कर्म, पूर्वजन्मकृतं, तत् दैवम्, इति (बुधैः) कथ्यते, तस्मात्, (जनः) अतन्द्रितः, (सन्) पुरूषकारेण, यत्नं, कुर्यात् ।

व्याख्याः– पूर्वजन्मेति । यत् कर्म=कार्यं, पूर्वजन्मकृतम्=पूर्वस्मिन् जन्मनि कृतम्, तत्=तदेव, दैवम्=भाग्यम् इति, बुधैः कथ्यते । तस्माद्धेतोः जनः अतन्द्रितः= आलस्य-रहितः, सन् पुरुषकारेण=पौरुषेण, यत्नम्=उद्योगम्, कुर्यात् ।

**यथा मृत्पिण्डतः कर्ता कुरूते यद्यदिच्छति ।**
**एवमात्मकृतं कर्म मानवः प्रतिपद्यते ॥३२॥**

अन्वयः– यथा, कर्ता, मृत्पिण्डतः, यत्, यत्कर्तुम्, इच्छति, (तत् तत्) कुरूते, एवं, मानवः आत्मकृतं, कर्मप्रतिपद्यते ।

व्याख्याः– यथेति । यथा=यद्वत्, कर्ता=कुलालः, मृत्पिण्डतः मृदां पिण्डं मृत्पिण्डम् तस्मात् पंचम्यास्तृतीयाया वा तसिप्रत्ययः । यद्यत्=घटशरावादिकम्, कर्तुम्=रचयितुम्, इच्छति=वाञ्छति, तत् तत्=ईप्सितम् वस्तु कुरूते=निर्माति, एवम् उक्तप्रकारेण, मानवः=मनुष्यः, आत्मकृतम्=आत्मना कृतम्=सम्पादितम्, कर्म=शुभाशुभं कर्मफलम्, प्रतिपद्यते=भुङ्क्ते ।

**काकतालीयवत् प्राप्तं दृष्ट्वाऽपि निधिमग्रतः ।**
**न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते ॥३३॥**

**अन्वयः**– काकतालीयवत्, प्राप्तं, निधिम्, अग्रतः, दृष्ट्वा, अपि, दैवं, न आदत्ते, (किन्तु तत्र अपि) पुरुषार्थम्, अपेक्षते ।

**व्याख्या:**– काकेति । काकतालीयवत् =काकतालीयन्यायेन दैववशात् अनायासेन, प्राप्तम् =लब्धम्, निधिम् =रत्नादिपूर्णं भाण्डम्, अग्रतः=पुरो भागे, दृष्ट्वाऽपि= विलोक्यापि, दैवम् =अदृष्टम्, स्वयम् न आदत्ते =आत्मना न गृह्णाति अभिलषितं न ददातीत्यर्थः । किन्तु तत्रापि पुरुषार्थम् =पुरुषयत्नम्, अपेक्षते =अभिलषति । अतो मानवैः पुरुषार्थोऽवश्यं कार्यः ।

**उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।**
**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ ३४ ॥**

**अन्वयः**– उद्यमेन, कार्याणि, हि, सिध्यन्ति, मनोरथैः, न (सिध्यन्ति) । हि, मृगाः, सुप्तस्य, सिंहाय, मुखे, न प्रविशन्ति ।

**व्याख्या:**– उद्यमेनेति । उद्यमेन =उद्योगेन (प्रयत्नेन) कार्याणि =कर्माणि, हि = निश्चयेन, सिध्यन्ति =फलन्ति, मनोरथैः =संकल्पमात्रैः, कार्याणि न सिध्यन्ति । हि =यतः, मृगाः =हरिणादयः पशवः, सुप्तस्य =निद्रितस्य, उद्योगशून्यस्येति भावः । सिंहस्य =मृग-राजस्य, मुखे =आनने स्वयमेव न प्रविशन्ति =न गच्छन्ति ।

**मातृपितृकृताभ्यासो गुणितामेति बालकः ।**
**न गर्भच्युतिमात्रेण पुत्रो भवति पण्डितः ॥३५॥**

**अन्वयः**– मातृपितृकृताभ्यासः, बालकः, गुणिताम्, एति, गर्भच्युतिमात्रेण, पुत्रः, पण्डितः, न भवति ।

**व्याख्या:**– मात्रिति । मातृपितृकृताभ्यासः =मात्रा पित्रा च कृतः कारितः, अभ्यासो येन सः मातृपितृभ्यां पाठितः, बालकः =तनयः, गुणितामेति= पण्डितत्वं प्राप्नोति । गर्भच्युतिमात्रेण =केवलं गर्भान्निःसरणकालत् एव पुत्रः =बालकः, पण्डितः =विद्वान् न भवति =न जायते ।

**माता शत्रुः पिता वैरी येन बालो न पाठितः ।**
**न शोभते सभामध्ये हंसमध्ये बको यथा ॥३६॥**

**अन्वयः**– येन, बालः, न पाठितः, (सः) पिता, बालस्य, वैरी (सा) माता, शत्रुः । हंसमध्ये, बकः, यथा, सभामध्ये, न शोभते ।

व्याख्या:– मातेति। येन=पित्रा मात्रा वा, बाल:=स्वपुत्र:, न पाठित:=न शिक्षित:, स पिता, वैरी=अहितकारी, सा माता शत्रु:=अहितकारिणी भवति। अशिक्षित: स बाल:, हंसमध्ये=मरालेषु, बको यथा=बकवत्, सभामध्ये=विद्वत्सभायाम् न शोभते=न राजते, आदृतो न भवतीत्यर्थ:।

**रूप–यौवनसम्पन्ना विशाल–कुलसम्भवा:।**
**विद्याहीना न शोभन्ते निर्गन्धा इव किंशुका: ॥३७॥**

**अन्वय:**– रूपयौन्नसम्पन्ना:, विशालकुलसम्भवा:, (अपि) विद्याहीना:, (जना:) निर्गन्धा: किंशुका:, इव, न शोभन्ते।

**व्याख्या:**– रूपेति। रूपयौवनसम्पन्ना:=रूपयौवनाभ्यां सौन्दर्येणयुवावस्थया च सम्पन्ना:, विशालकुलसम्भवा:=श्रेष्ठवंशजाता:, अपि विद्याहीना:=विद्यया हीना:=विद्यारहिता: जना:, निर्गन्धा:=गन्धरहिता:, किंशुका:=पलाशपुष्पाणीव, न शोभन्ते=न राजन्ते।

**मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टित।**
**तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥ ३८ ॥**

**अन्वय:**– सभायां, वस्त्रवेष्टित:, मूर्ख:, अपि तावत्, शोभते। तावत्, च मूर्ख:, शोभते, यावत्, किञ्चित्, न भाषते।

**व्याख्या:**– मूर्खेति। सभायाम्=पण्डितसदसि, वस्त्रवेष्टित:=पट्टादिसद्वस्त्रावृत:, मूर्ख:=विद्यारहित:, अपि तावत् शोभते। किन्तु तावत्=तावत्पर्यन्तम् च मूर्ख: शोभते, यावत्=यावत्कालपर्यन्तम्, किञ्चित्=किमपि, न भाषते=न वदति।

**एतच्च चिन्तयित्वा स राजा पण्डितसभां कारितवान्। राजोवाच– भो भो पण्डिता: ! श्रूयताम्– अस्ति कस्चिदेवम्भूतो विद्वान् यो मम पुत्राणां नित्यमुन्मार्गगामिनामनधिगतशास्त्राणामिदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थ: ?**

**व्याख्या:**– एतदिति। एतत्=इत्थम् च चिन्तयित्वा=विचार्य, स राजा पण्डितसभाम्=विद्वद्गोष्ठीम् कारितवान्। राजा उवाच–भो भो पण्डिता: श्रूयताम् कश्चित् एवंभूत:=ईदृश:, विद्वान् अस्ति ? य:=विद्वान्, मम नित्यम् उन्मार्गगामिनाम्=कुपथप्रवृत्तानाम्, अनधिगतशास्त्राणाम्=मूर्खाणाम्, पुत्राणाम्, इदानीम्=अधुना, नीतिशास्त्रोपदेशेन=नीतिविद्याध्यापनेन, पुनर्जन्म=जन्मान्तरम् कारयितुम्, समर्थ:=योग्य:।

**काच: काञ्चनसंसर्गात् धत्ते मारकतीं द्युतिम्।**
**तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम् ॥ ३९ ॥**

**अन्वयः–** (यथा) काचः, काञ्चनससर्गात्, मारकतीम्, द्युतिम्, धत्ते, तथा, मूर्खः, सत्सन्निधानेन, प्रवीणताम्, याति ।

**व्याख्याः–** काच इति। यथा=येन प्रकारेण, काचः=अपकृष्टो धातुविशेषः, काञ्चनसंसर्गात्=सुवर्णसंसर्गात्, मारकतीम्=मरकतमणिसम्बन्धिनीम्, द्युतिम्=प्रभाम्, धत्ते=धारयति। यथा=तद्वत् मूर्खः, तत्सन्निधानेन=सता विदुषां, सन्निधानेन=सान्निध्येन, प्रवीणताम्=पाण्डित्यम्, याति प्राप्नोति ।

**हीयते हि मतिस्तात ! हीनैः सह समागमात् ।**
**समैश्च समतामेति विशिष्टैश्च विशिष्टताम् ॥४०॥**

**अन्वयः–** हे तात ! हि, (जनस्य) मतिः, हीनैः, सह, समागमात्, हीयते, समैः, च समतां, विशिष्टैः, च विशिष्टताम्, एति।

**व्याख्याः–** हीयत–इति। हे तात ! जनस्य मतिः=बुद्धिः, हीनैः=नीचैः, सह=साकम्, समागमात्=सहवासात्, हीयते=नश्यति, समैः=आत्मतुल्यैः, समागमात्=समतामेति तुल्यतां याति, विशिष्टैः=विद्वद्भिश्च सह समागमात्, विशिष्टताम्=महत्वं यातीत्यर्थः।

**अत्रान्तरे विष्णुशर्मनामा महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञो बृहस्पतिरिवाऽब्रवीत्– देव ! महाकुलशम्भूता एते राजपुत्राः । तन्मया नीतिं ग्राहयितुं शक्यन्ते ।**

**व्याख्याः–** अत्रेति। अत्रान्तरे= अस्मिन्नेवावसरे, विष्णुशर्मनामा महापण्डितः= महाविद्वान्, सकलनीतिशास्त्रतत्त्वज्ञः=सम्पूर्णनीतिविद्याप्रवीणः, बृहस्पतिरिव=देवगुरुरिव अब्रवीत्=अवादीत्, महाकुलशम्भूताः=श्रेष्ठवंशोत्पन्नाः, एते= इमे, राजपुत्राः = कुमाराः। तत्=तस्मात्, मया=विष्णुशर्मणा, नीतिम्=राजशासनपद्धतिम्, ग्राहयितुम्=बोधयितुम्, शक्यन्ते=पार्यन्ते ।

**नाऽद्रव्ये निहिता काचित् क्रिया फलवती भवेत् ।**
**न व्यापार–शतेनापि शुकवत्पाठ्यते बकः ॥४१॥**

**अन्वयः–** अद्रव्ये, निहिता, काचित्, क्रिया, फलवती, न भवेत्। व्यापारशतेनापि, बकः, शुकवत्, न पाठ्यते ।

**व्याख्याः–** नेति। अद्रव्ये=असत्पात्रे, निहिता=स्थापिता प्रयुक्तेति भावः, काचित् क्रिया=कश्चनव्यापारः, शिक्षा वा, फलवती=सफला न भवेत्। यतः–व्यापारशतेनापि= उद्योग बाहुल्येनापि, बकः=मत्स्यादनपक्षिविशेषः, शुकवत्=कीरवत्, न पाठ्यते=नाध्याप्यते, तं कोऽपि पाठयितुं समर्थो न भवतीति भावः ।

अस्मिंस्तु निर्गुणं गोत्रे नाऽपत्यमुपजायते ।
आकरे पद्मरागाणां जन्म काचमणेः कुतः ।४२।।

**अन्वयः**– अस्मिन्, तु, गोत्रे, निर्गुणम्, अपत्यं, न उपजायते । पद्मरागाणाम्, आकरे, काचमणेः, जन्म, कुतः ?

**व्याख्याः**– अस्मिस्तु । अस्मिन् = श्रेष्ठे, तु गोत्रे = वंशे, निर्गुणम् = गुणरहितम् अपत्यम् = सन्ततिः, न उपजायते = न उदेति । यतः = यस्मात्, पद्मरागाणाम् = मणिविशेषाणाम्, आकरे = खनौ, उत्पत्तिस्थाने इत्यर्थः । काचमणेः = काचस्य, जन्म = उत्पत्तिः, कुतः कथम् ? नैव सम्भवतीति भावः ।

अतोऽहं षण्मासाभ्यन्तरे तव पुत्रान्नीतिशास्त्राऽभिज्ञान् करिष्यामि । राजा सविनयं पुनरुवाच–

कीटोऽपि सुमनः संगादारोहति सतां शिरः ।
अश्माऽपि याति देवत्वं महद्भिः सुप्रतिष्ठितः ।।४३।।

**अन्वयः**– सुमनः, सङ्गात्, कीटः, अपि, सतां, शिरः, आरोहति, महद्भिः, सुप्रतिष्ठितः, अश्मा, अपि देवत्वं, याति ।

**व्याख्याः**– कीट इति । सुमनःसङ्गात् = पुष्पसंसर्गात्, कीटोऽपि = क्षुद्रजीवोऽपि, सताम् = सज्जनानाम्, शिरः = मूर्धानम्, आरोहति = आरूढो भवति, महद्भिः = श्रेष्ठैः, सुप्रतिष्ठितः = स्थापितः, अश्माऽपि = प्रस्तरोऽपि, देवत्वम् = सुरभावम्, याति = प्राप्नोति ।

यथोदयगिरेर्द्रव्यं सन्निकर्षेण दीप्यते ।।
तथा सत्सन्निधानेन हीनवर्णोऽपि दीप्यते ।।४४।।

**अन्वयः**– यथा, द्रव्यम्, उदयगिरेः, सन्निकर्षेण, दीप्यते; तथा, हीनवर्णः, अपि, सत्सन्निधानेन, दीप्यते ।

**व्याख्याः**– यथेति । यथा = येन प्रकारेण, उदयगिरेः = उदयाचलस्य, द्रव्यम् = गैरिकादिपदार्थः, सन्निकर्षेण = सान्निध्येन सम्पर्केण इत्यर्थः । दीप्यते = प्रकाशतेः, तथा = तद्वत्, हीनवर्णोऽपि = नीचोऽपि, सत्सन्निधानेन = सत्तां सन्निधानम् इति तेन, सज्जनसंसर्गेण, दीप्यते = विराजते, गुणवान् भवतीति भावः । संसर्गजा दोषगुणा भवन्तीति तात्पर्यम् ।

गुणा गुणज्ञेषु गुणा भवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः ।
आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः ।।४५।।

**अन्वयः**– गुणाः, गुणज्ञेषु, गुणाः, भवन्ति, ते, निर्गुणं, प्राप्य, दोषाः, भवन्ति, (यथा) आस्वाद्यतोयाः, नद्यः, प्रवहन्ति, (ता एव) समुद्रम्, आसाद्य, अपेयाः, भवन्ति ।

**व्याख्याः**– गुणेति । गुणाः=विद्या–विनय–शौर्य–दयादाक्षिण्यादयः, गुणज्ञेषु=गुणवित्सु गुणाः=गुणपदवाच्याः, भवन्ति=जायन्ते, ते=गुणाः, निर्गुणम्=गुणरहितम्, जन्म प्राप्य= लब्ध्वा, दोषाः=अवगुणाः, भवन्ति यथा आस्वाद्यतोया=मधुरजलयुक्ताः, नद्यः =गङ्गादयः, प्रवहन्ति, किन्तु ता एव समुद्रम्=सागरम्, आसाद्य=प्राप्य, अपेयाः= पातुमयोग्याः भवन्ति ।

**तदेतेषामस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः प्रमाणम् । इत्युक्त्वा तस्य विष्णुशर्मणो बहुमानपुरस्सरं पुत्रान् समर्पितवान् ।**

**व्याख्याः**– तदिति । तत्=तस्मात् कारणात्, एतेषाम्=अग्रे समुपविष्टानाम्, अस्मत्पुत्राणाम्=मत्तनयानाम्, नीतिशास्त्रोपदेशाय=नीतिविद्याऽध्यापनाय, भवन्तः=यूयम्, प्रमाणम्=स्वतन्त्राः । इति=पूर्वोक्तम् उक्त्वा तस्य महापण्डितस्य विष्णुशर्मणः बहुमान-पुरस्सरम्=बहुमानःपुरस्सरो यस्मिन् तत् यथा स्यात्तथा सादरम्, पुत्रान्=स्वतनयान् समर्पितवान् ।

## अभ्यासः

१. हितोपदेशस्य अध्ययनेन को लाभ ?
२. बुद्धिमान् विद्योपार्जने अर्थोपार्जने च किं चिन्तयेत् ?
३. विद्यायाः महत्त्वं कीदृशम् ?
४. विद्या किं ददाति ?
५. द्वे विद्ये के ?
६. का विद्या सदा आद्रियते ?
७. अन्धः क ?
८. अनर्थाय कानि वस्तूनि ?
९. कीदृशः पुत्रः काणचक्षुः समः ?
१०. कीदृशी माता बन्ध्या ?
११. मातुरुच्चारः कीदृशः पुत्रः ?
१२. एकश्चन्द्रः किं करोति ?
१३. जीवलोकेषु कानि षट् सुखानि ?

१४. काः काः क्रिया मनुष्येषु पशुषु च समानाः ?
१५. कस्य जन्म निरर्थकम् ?
१६. गर्भस्थस्यैव प्राणिनः कानि वस्तूनि सृज्यन्ते ?
१७. कीदृशः पिता वैरी ?
१८. कियत्कालपर्यन्तं मूर्खः शोभते ?
१९. कीटोऽपि कथं सतां शिर आरोहति ?

**२०. अस्य श्लोकस्य व्याख्या कार्या**

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी........
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ।।

**२१. अस्य श्लोकस्य भावार्थो लेख्यः**

यथा मृत्पिण्डतः कर्ता........
........मानवः प्रतिपद्यते ।।

२२. "न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः" इत्यस्याशयं प्रकटयत।

**२३. अस्य श्लोकस्य व्याख्या कार्या**

रूप–यौवनसम्पन्नः........
निर्गन्धा इव किंशुकाः ।।

**२४. निम्नाङ्किततानां वाक्यानां नेपालीभाषायामनुवादं कुरुत**

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम् । तत्र सर्वस्वामिगुणोपेतः सुदर्शनो नाम नरपतिरासीत् । स भूपतिरेकदा केनापि पठ्यमानं श्लोकद्वयं शुश्राव ।

२५. हितोपदेशस्य प्रस्तावनाभागस्य सारांशो लेख्यः ।

**२६. परस्परं मेलयत**

| (क) | (ख) | |
|---|---|---|
| (क) पाटवम् | नम्रताम् | ( ) |
| (ख) विनय | पण्डितः | ( ) |
| (ग) लोचनम् | भाग्यम् | ( ) |
| (घ) सुधीः | चातुर्यम् | ( ) |
| (ङ) दैवम् | चक्षुः | ( |

# रघुवंशमहाकाव्यम्

## कालिदासस्य परिचयः

"काव्येषु माघः कविकालिदासः" इति कथनानुसारेण संस्कृतकविषु महाकवेः कालिदासस्य नाम प्रथमः । एष कविवरः संस्कृतसाहित्ये विश्वप्रसिद्धोऽस्ति । कविरयं प्राङ्मूर्ख आसीत् । एकया विदुष्या सह विवाहानन्तरं पत्न्या गृहान्निष्कासितोऽयं भगवतीं कालिमुपास्य तत्प्रसादाद् विद्यामधिगम्य विद्यया कवित्वशक्त्या च विभूषितः कालिदास इति सार्थकनामा सञ्जातः, इति किम्बदन्ती प्रसिद्धाऽस्ति । स शैवधर्मावलम्बी आसीदिति मङ्गलाचरणादपि ज्ञायते । अयमेव रघुवंश महाकाव्यस्य लेखकः ।

अस्य महाकाव्यस्य भाषा सरला स्वाभाविकी अलंकृता चास्ति । प्रायेणात्र प्रसादगुणः पाञ्चाली वैदर्भी च रीतिः, रसेषु शृङ्गारवीरकरुणानां प्रधानता च प्राप्यते।

**ग्रन्थाः-** अनेन कविना 'रघुवंशं 'कुमारसंभवं' चेति द्वे महाकाव्ये, 'ऋतुसंहारः' 'मेघदूतं' चेति द्वे खण्डकाव्ये, 'अभिज्ञानशाकुन्तलं' 'विक्रमोर्वशीयं' 'मालविकाग्निमित्रं' चेति त्रीणि रूपकाणि च रचितानि सन्ति ।

**अस्य कवे विशेषताः-** (१) उपमाचातुर्यम् (२) प्रकृतेर्मनोहरं चित्रणम् (३) स्वल्पशब्दैरभिप्रायप्रकटनसामर्थ्यम् (४) सुमधुरः पदविन्यासः (५) अलंकाराणां मञ्जुलः प्रयोगः (६) शृङ्गारकरुणयोर्हृदयग्राहिवर्णनम् (७) सरला प्रसादगुणमयी शैली चेति ।

**जन्मभूमिः-** केचन काश्मीरं, केचन वङ्गदेशं चास्य जन्मभूमिं मन्यन्ते, किन्तु, मेघदूतकाव्ये उज्जयिन्या वर्णने विशेषपक्षपातदर्शनात् 'उज्जयिनी' एवास्य जन्मभूमिरिति मन्यन्ते ।

**समयः-** डा. हार्नलीनामा पाश्चात्यो विद्वान् षष्ठमीशवीयशतोकं कालिदासस्य समय इति मन्यते । अन्ये केचन गुप्तकालः कालिदासस्य समय इति मन्वानाः चन्द्रगुप्तद्वितीयस्य समये कालिदास आसीदिति वर्णयन्ति । बहवो भारतीया विद्वांसस्तु ई० पू० प्रथमशतके उज्जयिन्यां वर्तमानस्य विक्रमादित्यभूपतेः नवरत्नेषु कालिदासोऽप्यन्यतमा आसीदिति ई० पू० प्रथमशतकं कालिदासस्य समय इति विश्वसन्ति । अस्य मतस्य समर्थक एकः श्लोकोऽप्युपलभ्यते–

धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटखर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नवविक्रमस्य ॥

# रघुवंशप्रथमसर्गस्य कथासारः

कालिदासो ग्रन्थारंभे शब्दार्थज्ञानलाभाय भवानीशंकरयोर्नमस्कारात्मकं मङ्गलमाचरति । मङ्गलाचरणानन्तरं कविः विनीतैः शब्दैः विदुषामग्रे स्वाहंकारं परिहरति । पूर्वैः कविभिः रामायणादिप्रबन्धरचनया कृतप्रवेशे रघूणां वंशवर्णने वज्रविद्धे मणौ सूत्रस्येव ममापि गतिनस्तीत्याह ।

## रघुवंशोद्भवानां राज्ञां वर्णनम्

रघुवंशोद्भवानां राज्ञां साम्राज्यं समुद्रपर्यन्तं विस्तृतमासीत् । स्वर्गपर्यन्तमपि तेषां रथस्य प्रसर आसीत् । ते अर्जितं द्रव्यं सत्पात्रेभ्यो यथेच्छं ददति स्म । दिगन्तपर्यन्तं स्वयशो विस्तारयितुं ते शत्रून्विजयन्ते स्म न केवलमभिभवितुम् । ते राजानः सन्तानलाभाय विवाहं कुर्वन्ति स्म । शैशवे गुरुकुले स्थित्वा ते विद्याभ्यासपरायणा आसन् । ते राजसिंहासनारूढाः सन्तो राजनीतिं सम्यक् पालयन्ति स्म । प्रजाजनहितायैव ते करं जगृहुः । वार्धके मुनिवृत्तिधारिणस्ते अन्तसमये परमात्मध्यानेन शरीरं विजहुः ।

## दिलीपवर्णनम्

अत्यन्तपवित्रे वैवस्वतमनोर्वंशे दिलीप इति प्रसिद्धः भूपतिरभवत् । स विशालवक्षाः उन्नतः आजानुबाहुश्चासीत् । राजसिंहासनारोहणानन्तरं तेनेतरे सर्वे भूपालाः स्ववीर्यप्रभावेण वशीकृता आसन् । तस्य न केवलं शरीरमात्रं सुन्दरं किन्तु बुद्धिरपि विमलाऽऽसीत् । निर्मलबुद्ध्या तेन शास्त्राभ्यासः कृतः । तेन सकलं कर्म च यथाशास्त्र सम्पादितम् । तस्य गुणाः प्रतापेन प्रचण्डाः, दयादाक्षिण्यादिना मनोहरा च आसन् । अत एव सोऽधृष्यः किन्तु सर्वैरभिगम्यश्चासीत् । प्रजाश्च तस्य मनूक्तमार्गान्न विचलन्ति स्म । प्रजानां कल्याणार्थमेव स ताभ्यः षष्ठांशरूपं करं जग्राह । चतुरंगिणीसेना तस्य शोभायै स्थापिता एव आसीत्, किन्तु तस्यार्थसाधकन्तु अकुण्ठिता बुद्धिः शत्रुविजयसमर्थं धनुश्चेति द्वयमेवासीत् ।

विषयेष्वनासक्तिः, विद्याभ्यासः, धर्मकर्माभिरुचिश्चेति जरसा विनाऽपि वृद्धोचिता गुणास्तस्यासन् । प्रजानां शिक्षणात्, रक्षणात्, भरणाच्च स पिताऽऽसीत्, तासां पितरस्तु

केवलं जन्महेतुभूता आसन् । धर्माविरुद्धावर्थकामौ तस्य जीवनं शोभयतःस्म । तस्य राज्ये जनाः परद्रव्यपरदारापहारादिदुष्कर्म नाचरन् । तस्य सर्वे गुणाः परार्थैकसाधका आसन् । चक्रवर्ती राजा दिलीपः समुद्रपर्यन्तां पृथिवीमेकपुरीमिव सम्यक् शशास । सनातनधर्मावलम्बिनस्तस्य मगधवंशजा सुदक्षिणा नाम्नी पतिपरायणा राजमहिषी आसीत् । किन्तु तस्यां राज्योत्तराधिकारवहनक्षमं, पुत्रमपश्यन् राजा मनसि खेदमावहन्नासीत् ।

## दिलीपस्य वसिष्ठाश्रमगमनम्

सन्तानप्रतिबन्धेन नितरां खिद्यमानो दिलीपः सचिवेषु राज्यभारं निक्षिप्य सन्तानोपायं पिपृच्छिषुः पत्न्या सुदक्षिणया सहितः कुलगुरोर्वसिष्ठस्याश्रमं जगाम । आश्रमपीडा मा भूदिति स्वल्पपरिजनो राजा, सपत्नीकस्तपोवनं प्रविवेश । मार्गे मनोभिरामं मयूरध्वनिं श्रृण्वन्तौ, रथरवभयान्मार्गं विहाय समीपात् रथं प्रति दृष्टिपातं कुर्वत्सु मृगमिथुनेषु परस्परं नयनसादृश्यं पश्यन्तौ राजदम्पती गुरोराश्रमं प्रति जग्मतुः । तौ मार्गे नवनीतमुपहारमादाय राजदर्शनायोपस्थितान्घोषवृद्धान्वन्यवृक्षाणां नामधेयानि पृच्छन्तौ जग्मतुः । पत्न्यै सुदक्षिणायै मार्गे नवीनानि वस्तूनि दर्शयन् राजा सायं गुरोराश्रमं प्राप ।

## आश्रमवर्णनम्

तदा समित्कुशादिकमादाय मुनयः पर्णशालां प्रविविशुः । नीवारभागमिच्छन्तो मृगाः सायं तदाश्रमद्वारमुपरुन्धन्तस्तिष्ठन्ति स्म । मुनिकन्यका आश्रमोद्याने वृक्षाणामालवाले जलमासिच्य, तत्रस्थजलं पक्षिणो निर्भयाः सन्तः पिबन्त्विति हेतोरालवालमुज्झन्ति स्म । केचन हरिणाः पर्णशालायाः प्राङ्गणे स्थित्वा निर्भयाः सन्तो रोमन्थं चक्रुः । प्रज्वलिताग्निसूचका आहुतिगन्धयुता धूमा आश्रमागतानामतिथीनां स्वागतं चक्रुः ।

## गुरुणा सह वार्ता

रथादवरुह्य सपत्नीको दिलीपः सपत्नीकं गुरुं वसिष्ठमभिववन्दे । वसिष्ठः सर्वत्र राज्ये कुशलं पप्रच्छ । राजा च गुरोरनुकम्पया सर्वत्र कुशलमस्तीति निवेदयामास । पुनश्च राज्ञा निवेदितम्– सर्वत्र निराकुलत्वेऽपि एषा सुदक्षिणा सन्तानरहिताऽस्तीति रत्नपूर्णापि मेदिनी न मां सुखयति । इदं पैतृकमृणं मां बन्धनस्तम्भो गजमिव पीडयतीति तन्मोचकमुपायमादिशतु इति । ततो ध्यानदृष्ट्या विलोक्य गुरुरगादीत्–पुरा स्वर्गात्प्रतिनिवर्तमानेन ऋतुमतीं पत्नीं सुदक्षिणां चिन्तयता त्वया मार्गे प्रदक्षिणार्हा कामधेनुं न सत्कृता । अतस्तया मत्प्रसूतिमनाराध्य तव सन्ततिर्माभूदिति शापो दत्तः । गङ्गारवेण

स शापस्त्वया सूतेन च न श्रुतः। इदानीं तस्याः काम धेनोःसुता नन्दिनी ममाश्रमे वर्तते, सपत्नीकस्तां श्रद्धयाऽऽराधय, सन्तुष्टा सती सा तव कामं पूरयिष्यति इति। तस्मिन्नेव समये सा धेनुरपि वनादाववृते।

## (नन्दिनी) धेनुवर्णनम्

पल्लव इव पाटलवर्णा सा धेनुर्ललाटे नवं चन्द्रमिव श्वेतरोमाङ्कं धारयति स्म। पीनपयोधरा सा यदा वत्सं स्मरति तदा स्तनेभ्यः प्रवहता क्षीरेण भुवमासिञ्चति स्म। खुरोद्धूतैर्धूलिभि राज्ञो गात्रं स्पृष्ट्वा तीर्थस्नानजनितां पवित्रतां कुर्वती नन्दिनी नाम धेनुश्च वनादागतवती। तां दृष्ट्वा वसिष्ठः पुनरवदत्–हे राजन्, खेदं मा कुरु, सिद्धिं शीघ्रभाविनीं मन्यस्व, यतो नामकथनानन्तरमेवेयं कल्याणी त्वत्समीपमुपस्थिता इति।

## गोसेवाप्रकारः

कुलगुरुर्वसिष्ठो सेवाप्रकारं दर्शयन्नुवाच– हे राजन्! भवता वन्यकन्द-मूलादिकं भोजनं कृत्वा सदाऽनुगमनेनैषा धेनुः प्रसादनीया। तस्यां प्रस्थितायां सत्यां त्वयाऽपि प्रस्थानं कार्यम्, स्थितायां स्थेयम्, उपविष्टायामुपवेश्यम्, जलं पीतवत्यां त्वया च जलं पातव्यम्। एषा सुदक्षिणा च पवित्रीभूय प्रातः किञ्चिद् दूरं धेनुमनुव्रजेतु, सायं च वनादागच्छन्तीं प्रत्युद्गच्छतु। इत्थं सेवया तव कार्यसिद्धिर्भविष्यति, अविघ्नमस्तु इति।

एवामशिषं दत्वा मुनिर्वसिष्ठो वन्यसामग्रीभिरेव राज्ञो भोजनवासस्थानादिप्रबन्ध-मकरोत्। राजाऽपि सुदक्षिणासहितः कुलपतिना निर्दिष्टां पर्णशालामध्यास्य सानन्दं निशाम-तिवाह्य प्रातः शिष्याणामध्ययनरवेण सह समुत्थितः।

# प्रथमः सर्गः

## मङ्गलाचरणम्

**सकलकविशिरोमणिर्महाकविः कालिदासः विघ्नविघाताय ग्रन्थादौ शिष्टाचारप्राप्तं पार्वतीपरमेश्वरयोर्नमस्कारात्मकं मङ्गलमाचरति**

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पर्वतीपरमेश्वरौ ॥**

**अन्वयः**– वागर्थौ, इव, सम्पृक्तौ, जगतः, पितरौ पार्वती–परमेश्वरौ, वागर्थप्रतिपत्तये, वन्दे ।

**व्याख्या:**– अहं=कालिदासः, वागर्थौ (वाक् च अर्थश्च तौ) = शब्दार्थौ, इव=यथा, सम्पृक्तौ=नित्यमिलितौ, जगतः=लोकस्य, पितरौ (माता च पिता च पितरौ तौ "पिता मात्रा" इति सूत्रेण एकशेषः) = मातरपितरौ (मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ–इत्यमरः) पार्वतीपरमेश्वरौ (पार्वती च परमेश्वरश्च तौ) = उमामहेश्वरौ, वागर्थप्रतिपत्तये (वाक् च अर्थश्च वागर्थौ तयोः प्रतिपत्तिस्तस्यै) = शब्दार्थज्ञानाय, वन्दे=अभिवादये (नमस्करोमि इत्यर्थः) ।

**भावार्थः**– शब्दार्थौ इव नित्यं मिलितौ जगत्स्रष्टारौ पार्वतीपरमेश्वरौ शब्दार्थज्ञानप्रदानसमर्थौ स्तः, अहं कालिदासः शब्दार्थज्ञानलाभाय तौ नमस्करोमि । अस्मिन् सर्गे अन्तिमं श्लोकं विहाय सर्वत्र अनुष्टुभ् वृत्तम् ।

**श्लोकद्वयेन कवि स्वाहंकारं परिहरति**

**क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।**
**तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥२॥**

**अन्वयः**– सूर्यप्रभवः, वंशः क्व ? अल्पविषया, (मम) मतिश्च, क्व ? (अहम्) मोहात्, उडुपेन, दुस्तरं, सागरम्, तितीर्षुः, अस्मि ।

**व्याख्या:**– सूर्यप्रभवः=प्रभवति अस्मात् इति प्रभवः कारणम् । (सूर्यः प्रभवो यस्य सः) =दिवाकरोत्पन्नः, (सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः– इत्यमरः) वंशः=कुल, क्व=कुत्र ? अल्पविषया=(अल्पः विषयो यस्याःसा) स्वल्पज्ञेयार्था, (मम) मतिश्च= बुद्धिश्च, क्व=कुत्र ? (उभयोर्महदन्तरमित्यर्थः) (अहम्) मोहात्=अज्ञानात्, उडुपेन=अल्पनौकया, दुस्तरं=दुःखेन तरितुं शक्यं सागरं=समुद्रं तितीर्षुः (तरितुमिच्छति तितीर्षति, तितीर्षतीति तितीर्षुः "सनाऽऽशंसभिक्ष उः" इति उप्रत्ययः) = तरितुमिच्छुः, अस्मि=विद्ये ।

**भावार्थः**– विस्तृततस्य सूर्यवंशस्य स्वल्पज्ञानयुताया मम बुद्धेश्च महदन्तरमस्ति, तथापि अल्पनौकामादाय अज्ञानवशीभूतोऽहं विशालं सागरं तरितुमिच्छामि यथा अल्प नौकया समुद्रतरणं न सुकरं तथा ममाल्पबुद्ध्या सूर्यवंशवर्णनं न सुकरम् ।

**उपहाससंभावना**

**मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम् ।**
**प्रांशुलभ्ये फलेलोभादुद्बहुरिव वामनः ॥३॥**

**अन्वयः**– मन्दः (तथापि), कवियशः प्रार्थी, (अहम्) प्रांशुलभ्ये, फले, लोभात्, उद्बाहुः वामन इव, उपहास्यताम्, गमिष्यामि ।

**व्याख्याः**– मन्दः =मूढ,:अल्पमतिरित्यर्थः (तथापि) कवियशः प्रार्थी = (कवीनां यशः कवियशः तत् प्रार्थयति तच्छील इति कवियशः प्रार्थी) =कविकीर्तिकामुकः (अहं कालिदासः) प्रांशुलभ्ये =प्रांशुना उन्नतपुरुषेण लभ्यं प्राप्यं तस्मिन् । फले =प्रसव, लोभात् =लोलुपतया, उद्बाहुः (उद्गतो बाहु यस्य सः) =ऊर्ध्वभुजः, वामन इव= खर्व इव (खर्वो ह्रस्वश्च वामनः – इत्यमरः) उपहास्यताम् =उपहासयोग्यताम् गमिष्यामि = प्राप्स्यामि ।

**भवार्थः**– यथा उन्नतपुरुषलभ्यं फलमादातुं लोभाविष्टमूर्ध्वबाहुं वामनं जना उपहसन्ति तथैव मन्दबुद्धित्वेऽपि कवीनां कीर्तिमिच्छन्तं मां विद्वांस उपहसिष्यन्ति ।

**मन्दत्वेऽपि काव्यरचनावकाशं दर्शयति**

**अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः ।**
**मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गति ।।४।।**

**अन्वयः**– अथवा, पूर्वसूरिभिः, कृतवाग्द्वारे, अस्मिन्, वंशे, वज्रसमुत्कीर्णे, मणौ, सूत्रस्य इव, मे, गतिः, अस्ति ।

**व्याख्याः**– अथवा =आहोस्वित्, पूर्वसूरिभिः(पूर्वे च ते सूरयस्तैः) =प्राच्यैर्वाल्मीक्यादिभिः कविभिः, कृतवाग्द्वारे =कृतं विहितं वाक् एव रामायणादिप्रबन्धरूपा वाण्येव द्वारं प्रवेशो यस्य तस्मिन्, अस्मिन् =पूर्वोक्ते, वंशे =अन्ववाये (वंशोऽन्ववायःसन्तानः-इत्यमरः) वज्रसमुत्कीर्णे =वज्रेण मणिवेधकसूचीविशेषेण समुत्कीर्णो विद्धस्तस्मिन् मणौ =रत्ने, सूत्रस्य इव =तन्तोरिव, मे =मम, गति =सञ्चारः, अस्ति =विद्यते ।

**भवार्थः**– वाल्मीक्यादिभिः पूर्वकविभिः रामायणादिप्रबन्धरचनाद्वारा रघुवंशे प्रवेशः कृत एव, अतो ममापि तत्र वंशे हीरकविद्धे मणौ तन्तोरिव वाक्प्रसरोऽस्ति ।

**पञ्चभिः श्लोकैः (कुलकेन) रघुवंशवर्णनप्रतिज्ञां करोति**

**सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।**
**आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्॥५॥**

**अन्वयः**– सः, अहम्, आजन्मशुद्धानां, आफलोदयकर्मणाम्, आसमुद्रक्षितीशानाम्, अनाकरथवर्त्मनाम् (रघूणाम्, अन्वयम्, वक्ष्ये)।

**व्याख्याः**– सः =मन्दमतिः, अहं = कालिदासः, आजन्मशुद्धानाम् (जन्मन आ आरभ्येति आजन्म, आजन्मनः शुद्धा आजन्मशुद्धास्तेषाम्) = आजन्मनः = जन्मारभ्य, शुद्धाः=गर्भाधानादिसंस्कारेण पवित्रास्तेषाम् । आफलोदयकर्मणाम् =फलोदयमभिव्याप्य इति आफलोदयं =फलसिद्धिपर्यन्तं, कर्म =उद्योगो येषान्ते तेषाम् (फलसिद्धिपर्यन्तं कर्मानुष्ठातॄणामित्यर्थः)। आसमुद्रक्षितीशानाम् (समुद्रमभिव्याप्य आसमुद्रम्, आसमुद्रं क्षितीशाः आसमुद्रक्षितीशास्तेषाम्) =समुद्रपर्यन्तपृथिवीपालानाम् । आनाकरथवर्त्मनाम् (नाकमभिव्याप्य आनाकम्, रथस्य वर्त्म रथवर्त्म, आनाकं रथवर्त्म एषां ते आनाकरथवर्त्मानस्तेषाम्) =आनाकं =स्वर्गपर्यन्तं, रथवर्त्म =स्यन्दनगतिर्येषां तेषाम् । (ईदृशानां) रघूणां=रघुकुलोत्पन्ननृपाणाम्, अन्वयं =वंशं, वक्ष्ये =कथयिष्यामि इति उत्तरेण संबन्धः।

**भावार्थः**– कालिदासः प्रतिज्ञां करोति यत् अहं जन्मसमयादेव गर्भाधानादिसंस्कारेण शुद्धानां फलसिद्धिपर्यन्तमुद्योगशीलानां समुद्रपर्यन्तपृथिवीश्वराणां रथेन स्वर्गपर्यन्तगामिनां रघुकुलोत्पन्ननृपाणां वंशवर्णनं करिष्ये।

**यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।**
**यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥६॥**

**अन्वयः**– (सः अहम्) यथाविधिहुताग्नीनां, यथाकामार्चितार्थिनां, यथापराध-दण्डानां, यथाकालप्रबोधिनां (रघूणाम्, अन्वयं, वक्ष्ये)।

**व्याख्याः**– (सः= पूर्वोक्तः मन्दबुद्धिः, अहं=कालिदासः) यथाविधिहुताग्नीनां (विधिमनतिक्रम्य यथाविधि, यथाविधि हुता अग्नयो यैस्ते यथाविधिहुताग्नयस्तेषाम्) = विधिपूर्वकम् अग्नौ कृतहवनानाम्।यथाकामार्चितार्थिनां (काममनतिक्रम्य यथाकामम्यथाकामम् अर्चिता अर्थिनो यैस्ते यथाकामार्चितार्थिनस्तेषाम्) =यथाकामं =यथेच्छम्, अर्चिताः =सत्कृता अर्थिनो याचका यैस्तेषाम् । यथापराधदण्डानां (अपराधमनतिक्रम्य यथापराधं, यथापराधं दण्डो येषां ते यथापराधदण्डास्तेषाम्) = अपराधानुसारेण दण्डकुर्वताम् । यथाकालप्रबोधिनां ( कालमनतिक्रम्य यथाकालम्, यथाकालं प्रबुध्यन्ते इति यथाकाल प्रबोधिनस्तेषाम्) =यथोचितसमये जागरणशीलानाम् । (ईदृशां रघूणाम् अन्वयं वक्ष्ये)।

**भावार्थः**– शास्त्ररीत्या हवनं कुर्वतां, इच्छानुरूपं सत्कृतयाचकानां, अपराधानुसारेण दण्ड्यं दण्डयतां, समुचितसमयेजागरणपराणां रघुकुलनृपाणामन्वयं वर्णयिष्ये।

**त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।**
**यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥७॥**

**अन्वयः**– (सः अहम्) त्यागाय, सभृतार्थानां, मितभाषिणां, यशसे विजिगीषूणां प्रजायै, गृहमेधिनां (रघूणाम्, अन्वयं, वक्ष्ये)।

**व्याख्याः**– (सः अहं कालिदासः) त्यागाय,=दानाय, सभृतार्थानाम् (संभृतः अर्थो यैस्ते संभृतार्थास्तेषाम्) = संचितधनानाम् । सत्याय = तथ्याय, मितभाषिणाम् (मितं भाषन्ते तच्छीला इति मितभाषिणस्तेषाम्) =परिमितवादिनाम् । यशसे=कीर्तये, विजिगीषूणाम् (विजेतुमिच्छन्ति विजिगीषन्ते, विजिगीषन्ते इति विजिगीषवस्तेषाम् "सनाऽऽशंस भिक्ष उ" रिति उप्रत्ययः) =विजयाभिलाषिणाम् । प्रजायै=सन्तत्यै, (प्रजा स्यात्सन्ततौ जने-इत्यमरः) गृहमेधिनां=दारपरिग्रहेण गृहस्थाश्रमं कुर्वताम् । (ईदृशगुणानां रघूणाम् अन्वयं वक्ष्ये) ।

**भावार्थः**– अहं कालिदासः सत्पात्रे दानाय धनसंग्रहं कुवतां सत्यार्थं परिमितवक्तृणां कीर्तिलाभाय शत्रून्विजेतुमिच्छतां सन्तानार्थं दारपरिग्रहाणां रघूणाम् अन्वयं वर्णयिष्ये ।

**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।**
**वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥८॥**

**अन्वयः**– (सः अहम्) शैशवे, अभ्यस्त विद्यानां, यौवने, विषयैषिणां, वार्धके, मुनिवृत्तीनां, अन्ते, योगेन, तनुत्यजाम् (रघूणामन्वयं वक्ष्ये) ।

**व्याख्याः**– (सः अहं कालिदासः) शैशवे, (शिशोर्भावः शैशवं तस्मिन्) =बाल्ये, अभ्यस्तविद्यानाम् (अभ्यस्ता विद्या यैस्तै अभ्यस्तविद्याः तेषाम्) =अधीतशास्त्राणाम् । यौवने (यूनो भावः यौवनं तस्मिन्) =तारुण्ये, विषयैषिणाम् (विषयम् इच्छन्तीति विषयैषिणस्तेषाम्) =वनितादिभोगाभिलाषिणाम् । वार्धके (वृद्धस्य भावः वार्धकं तस्मिन्) =वृद्धावस्थायाम्, मुनिवृत्तीनाम् (मुनेरिव वृत्तिर्येषां ते मुनिवृत्तयः तेषाम्) =मुनितुल्यव्यापाराणाम् । अन्ते=मरणसमये, योगेन=चित्तवृत्तिनिरोधेन, तनुत्यजाम् (तनुं त्यजन्तीति तनुत्यजस्तेषाम्) =शरीरत्यागिनाम् (ईदृशां रघूणामन्वयं वक्ष्ये ।

**रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।**
**तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥९॥**

**अन्वयः**– (सः अहम्) तनुवाग्विभवः, अपि, तद्गुणैः, कर्णम्, आगत्य, चापलाय, प्रचोदितः, सन्, रघूणाम्, अन्वयं, वक्ष्ये ।

**व्याख्याः**– (सोऽहं मन्दबुद्धिः कालिदासः) तनुवाग्विभवः (तनुः वाग्विभवो यस्य सः) =तनुः=अल्पः, वाग्विभवः=वचनप्रसारो यस्य सः, तथाभूतः, अपि=च । तद्गुणैः

(तेषां गुणास्तद्गुणास्तैः) =तेषां रघुणां आजन्मशुद्धयादयः तैः, कर्णं=श्रोत्रम्' आगत्य =एत्य,चापलाय =चञ्चलत्वाय शीघ्रं तद्गुणवर्णनव्यापारायेत्यर्थः, प्रचोदितः= प्रेरितः, सन् =भवन्, रघुणां =रघुकुलोत्पन्ननृपाणाम्, अन्वयं =वंशं, वक्ष्ये =वर्णयिष्यामि ।

**भावार्थः**– अल्पज्ञोऽपि अल्पवचनविस्तारोऽपि अहं कालिदासो बहुविधगुणगण-विभूषितानां रघुकुलोत्पन्ननृपाणां गुणैः कर्णे काश्यरवाचाचापल्याय प्रेरितः सन् तेषां रघूणां वंशं वर्णयिष्ये ।

**स्वरचितकाव्यपरीक्षार्थं सतः प्रार्थयति**

**तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।**
**हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा ॥१०॥**

**अन्वयः**– सदसद्व्यक्तिहेतवः, सन्तः, तं, श्रोतुम्, अर्हन्ति, हि, हेम्नः, विशुद्धिः, वा, श्यामिका अपि, अग्नौ, संलक्ष्यते ।

**व्याख्याः**– सदसद्व्यक्तिहेतवः (सत् च असत् च सदसती, सदसतोर्व्यक्तिः तस्या हेतवः) =गुणदोषविवेचनकर्तारः, सन्तः=विद्वांसः, तं =काव्यात्मकं प्रबन्धं, श्रोतुम् = आकर्णयितुम्, अर्हन्ति =योग्या भवन्ति। हि=यतः, हेम्नः =सुवर्णस्य, (स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्' –इत्यमरः) विशुद्धिः =शुद्धता (निर्दोषता), वा =अथवा, श्यामिका अपि =कृष्णता च (द्रव्यान्तरसंयोगेन दुष्टता चेत्यर्थः)। अग्नौ=वह्नौ (अग्निर्वैश्वानरो वह्निः– इत्यमरः)संलक्ष्यते =ज्ञायते ।

**भावार्थः**– विद्वांस एव काव्यस्य गुणदोषपरीक्षायै कुशला भवन्ति, अतस्ते ममाप्येतस्य प्रबन्धस्य गुणदोषौ विवेचयन्तु, यथा सुवर्णस्य शुद्धता वा अशुद्धता अग्नौ दृश्यते ।

**वर्ण्यवस्तूपक्षिपति श्लोकद्वयेन**

**वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।**
**आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥११॥**

**अन्वयः**– छन्दसां, प्रणव, इव, मनीषिणां, माननीयः, महीक्षिताम्, आद्यः, वैवस्वतः नाम, मनुः, आसीत् ।

**व्याख्याः**– छन्दसाम्, =वेदानाम्, प्रणवः =ओङ्कारः, इव =सदृशः, मनीषिणाम् = (मनस ईषिणस्तेषाम्) विदुषाम्, माननीयः =पूज्यः,( अग्रणीः ) महीक्षिताम् = क्षितीश्वराणाम्,

आद्यः=प्रथमः, वैवस्वतः=विवस्वत्पुत्रः (सूर्यपुत्रः), नाम=वैवस्वतनाम्ना ख्यातः, मनुः (सप्तमो मनुः)=वैवस्वतमनुः, आसीत्=बभूव ।

भावार्थः– वेदानाम् ओङ्कारसदृशो विदुषां पूज्यः, राज्ञां प्रथमः सूर्यस्य पुत्रो वैवस्वतो नाम मनुः बभूव ।

**तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।**
**दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥१२॥**

अन्वयः– शुद्धिमति, तदन्वये, शुद्धिमत्तरः, राजेन्दुः, दिलीपः इति, क्षीरनिधौ, इन्दुः इव, प्रसूतः ।

व्याख्याः– शुद्धिमति=(शुद्धिरस्यातीति शुद्धिमान् तस्मिन्)दोषरहिते(निष्कलङ्के), तदन्वये=(तस्य मनोरन्वये वंशे), शुद्धिमत्तरः =(अतिशयेन शुद्धिमाञ्शुद्धिमत्तरः) अतीवपूतः, राजेन्दुः=भूपचन्द्रः (राजश्रेष्ठः), दिलीपः इति=दिलीपनाम्ना प्रसिद्धः, क्षीरनिधौ=क्षीरसमुद्रे, इन्दुः इव=चन्द्र इव, प्रसूतः=जातः ।

भावार्थः– तस्मिन् मनुवंशे शुद्धचरित्रवान् राजश्रेष्ठः, दिलीपः क्षीरसमुद्रे चन्द्र इव प्रसूतः ।

व्यूढ इत्यादित्रिभिः श्लोकैर्दिलीपं विशिनष्टि

**व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।**
**आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥१३॥**

अन्वयः– व्यूढोरस्कः, वृषस्कन्धः, शालप्रांशुः, महाभुजः, आत्मकर्मक्षम, देहम् आश्रितः, क्षात्रः, धर्मः इव (स्थितः) ।

व्याख्याः– व्यूढोरस्कः,=(व्यूढं विपुलमुरो यस्य स व्यूढोरस्कः) विपुलवक्षस्थलः, वृषस्कन्धः=वृषभांसः, शालप्रांशुः=शालः शालनामक तरुः तद्वद् उन्नतः, महाभुजः= महाबाहुः(आजानुबाहुः), आत्मकर्मक्षमम्=(आत्मनः कर्म आत्मकर्म, तस्मिन् क्षम तम्) स्वव्यापारानुरूपम्, देहम्=शरीरम्, आश्रितः=प्राप्तः, क्षात्रः=क्षत्रियसम्बन्धी, धर्मः इव=स्वभावः इव, (मूर्तिमान्पराक्रम इव स्थितः) ।

भावार्थः– विशालवक्षस्थलः, वृषस्कन्धः, शालतरुवद्उन्नतः, दीर्घभुजः, राजा दिलीपः स्वकार्यसमर्थशरीरधारी क्षात्रधर्म इव सञ्जातः ।

**सर्वातिरिक्तसारेण सर्वतेजोभिभाविना ।**
**स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ॥१४॥**

**अन्वयः**– सर्वातिरिक्तसारेण, सर्वतेजोऽभिभाविना, सर्वोन्नतेन, आत्मना, मेरुः, इव उर्वीम्, क्रान्त्वा, स्थितः ।

**व्याख्याः**– सर्वातिरिक्तसारेण = (अतिरिक्तः सारः यस्य सः अतिरिक्तसारः, सर्वेभ्यः अतिरिक्तसारः सर्वातिरिक्त सारः तेन) सर्वेभ्यो भूतेभ्योऽधिकबलेन, सर्वतेजोऽभिभाविना = (सर्वाणि तेजसाऽभिभवतीति सर्वतेजोऽभिभावी तेन) सकलप्रभावाभिभवकारिणा, सर्वोन्नतेन = सर्वेभ्य उन्नतेन, आत्मना = शरीरेण, मेरुः = सुमेरुः, इव = सदृशः, उर्वीम् = पृथिवीम्, क्रान्त्वा = आक्रम्य, स्थितः = अतिष्ठत्।

**भावार्थः**– सुमेरुपर्वतः यथा पृथ्वीं क्रान्त्वा स्थितो वर्तते। तथैव राजा दिलीपोऽपि स्वपराक्रमेण सर्वान् नृपान् वशीकृत्य स्थित आसीत् ।

**आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।**
**आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥१५॥**

**अन्वयः**– आकारसदृशप्रज्ञः, प्रज्ञया, सदृशागमः, आगमैः, सदृशारम्भः, आरम्भसदृशोदयः (आसीत्) ।

**व्याख्याः**– दिलीपः आकारसदृशप्रज्ञः = (आकारेण सदृशी प्रज्ञा यस्य सः) आकृतितुल्यबुद्धिः, प्रज्ञया = बुद्धया, सदृशागमः = प्रज्ञाऽनुरूपशास्त्रपरिश्रमः, आगमैः = राजनीत्यादिभिः शास्त्रैः, सदृशारम्भः = (सदृशः आरम्भः यस्य सः) आरम्भसदृशोदयः = उपक्रमानुरूपफलसिद्धिश्च (आसीत्) ।

**भावार्थः**– राजा दिलीपः, शरीरसदृशबुद्धिः, बुद्धिसदृशशास्त्रवेत्ता, शास्त्राणामनुसारं कर्मारम्भकारी, आरब्धकर्मानुसारं प्राप्तफलश्चासीत् ।

**भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।**
**अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥१६॥**

**अन्वयः**– भीमकान्तैः, नृपगुणैः, सः, उपजीविनां, यादोरत्नैः, अर्णवः, इव अधृष्यश्च, अभिगम्यश्च बभूव ।

**व्याख्याः**– भीमकान्तैः = भयङ्करमनोज्ञैः, नृपगुणैः = राजगुणैस्तेजः प्रतापादिभिः, सः = दिलीपः, उपजीविनाम् = आश्रितानाम्, यादोरत्नैः = (यादांसि च रत्नानि च इति यादोरत्नानि तैः) जलजीवमणिभिः, अर्णवः = समुद्रः, इव अधृष्यश्च = अनभिभवनीयश्च, अभिगम्यश्च = आश्रयणीयश्च बभूव ।

**भावार्थः**– राजा दिलीपः समुद्रसमान आसीत् । समुद्रः जलजन्तुभिः भयानकः रत्नादिना मनोरमः तादृशः एव राजा दिलीपोऽपि तेजः प्रतापादिगुणैः भयानकः दया-दाक्षिण्यादिगुणैः आश्रययोग्य आसीत् ।

**रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम् ।**
**न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥१६॥**

**अन्वयः**– नियन्तुः, तस्य, नेमिवृत्तयः, (इव) प्रजाः, आमनोः, क्षुण्णात्, वर्त्मनः, परं रेखामात्रम्, अपि, न व्यतीयुः ।

**व्याख्याः**– नियन्तुः=शिक्षकस्य सारथेश्च, तस्य=दिलीपस्य, नेमिवृत्तयः=(नेमीनां वृत्तिरिव वृत्तिः यासां ताः) चक्रधाराव्यापाराः, इव प्रजाः=जनाः, आमनोः=मनुम् आरभ्य, क्षुण्णात्=अभ्यस्तात् (नेमिपक्षे प्रहतात्) वर्त्मनः=आचारपद्धतेः, अध्वनश्च परम्=अधिकम् (इतस्ततः) रेखामात्रम्=रेखाप्रमाणम्, अपि=ईषदपि, न व्यतीयुः=नातिक्रान्तवत्यः ।

**भावार्थः**– कुशलस्य शासकस्य दिलीपस्य शासने वर्तमानाः प्रजाः मनुकालात् प्रचलितं सदाचारमार्गं रेखामात्रमपि नोल्लङ्घयन्तिस्म यथा कुशलेन सारथिना प्रचालितस्य रथस्य चक्रं स्वर्गं रेखामात्रमपि न त्यजति ।

**प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।**
**सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥१८॥**

**अन्वयः**– सः, प्रजानां, भूत्यर्थम्, एव, ताभ्यः, बलिम्, अग्रहीत् । हि, रविः, सहस्रगुणम्, उत्स्रष्टम्, रसम्, आदत्ते ।

**व्याख्याः**– सः=महाराजो दिलीपः, प्रजानाम्=जनानाम्, भूत्यर्थम्=वृद्धयर्थम्, एव=निश्चयेन, ताभ्यः=प्रजाभ्यः, बलिम्=षष्ठांशरूपं करम्, अग्रहीत्=जग्राह । हि=यतः, रविः=सूर्यः, सहस्रगुणम्=(सहस्रगुणा यस्मिन्कर्मणि तद्यथा तथा सहस्रगुणम्) सहस्रगुणाधिकम्, उत्स्रष्टुम्=दातुम्, रसम्=जलम्, आदत्ते=गृह्णाति ।

**भावार्थः**– राजा दिलीपः प्रजानां समृद्धयर्थम् एव करम् अग्रहीत् । यथा सूर्यः (मेघेन) पृथिव्यां सहस्रगुणं दातुं समुद्रात् जलं गृह्णाति तथैव दिलीपोऽपि प्रजाभ्यः करं गृहीत्वा जनानां कल्याणाय बहुधनं व्ययीकृत्य धर्मार्थादिकार्यम् अकरोत् ।

**सेनापरिच्छदस्तस्य द्वयमेवार्थसाधनम् ।**
**शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ॥१९॥**

**अन्वयः**– तस्य, सेना, परिच्छदः, (बभूव)। अर्थसाधनम्, द्वयम्, एव, शास्त्रेषु, अकुण्ठिता, बुद्धिः, च धनुषि, आतता, मौर्वी (अभूत्)।

**व्याख्याः**– तस्य=राज्ञः दिलीपस्य, सेना=चतुरङ्गबलम्, परिच्छदः=परिच्छाद्यतेऽनेनेति परिच्छदः) उपकरणम् छत्रचामरादितुल्यम् बभूव। अर्थसाधनम्=(अर्थस्य साधनम् अर्थसाधनम्) प्रयोजननिवर्तनम् द्वयम् एव=द्वितयम् एव, शास्त्रेषु=राजनीत्यादिशास्त्रेषु, अकुण्ठिता=अव्याहता, बुद्धिः=मतिः, च=द्वितीयम् धनुषि=कार्मुके, आतता=आरोपिता, मौर्वी=ज्या च, अभूदित्यर्थः।

**भावार्थः**– महाराजदिलीपस्य चतुरंगिणीसेना शोभार्थम् आसीत्। तस्य प्रयोजनार्थं च एका अकुण्ठिता बुद्धिः आसीत् अपरा च सदा धनुषि आरोपिता मौर्वी अभूत्। दिलीपस्य शौर्यं नीतिपुरःसर मेवाभूदित्यर्थः।

**राज्यमूलं मन्त्ररक्षणं तस्यासीदित्याह**

**तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च।**
**फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ॥२०॥**

**अन्वयः**– सवृत मन्त्रस्य, च, गूढाकारेङ्गितस्य, तस्य प्रारम्भाः, प्राक्तनाः, संस्काराः, इव, फलानुमेयाः, (आसन्)।

**व्याख्याः**– संवृतमन्त्रस्य=(संवृतः मन्त्रः यस्य सः संवृतमन्त्रः तस्य) गुप्तविचारस्य, च=पुनः, गूढाकारेङगितस्य=(गूढे आकारेङगितेयस्य सःगूढाकाङ्गितः तस्य) गुप्ताकृतिहृद्गतभावस्य, तस्य=राज्ञः दिलीपस्य, प्रारम्भाः=सामाद्युपायप्रयोगाः, प्राक्तनाः=पूर्वजन्मोद्भवाः,संस्काराः=कर्मवासना इव, फलानुमेयाः=फलेन अनुमातुं योग्याः आसन्।

**भावार्थः**– राज्ञः दिलीपस्य विचारो ज्ञातुं न शक्यते। स दिलीपो हर्षशोकादिसूचकलक्षणं गुप्तरूपे रक्षति। तस्य सामदानादिसर्वकार्यं पूर्वजन्मनः संस्कारसमानाः परिमाणप्रदर्शनेनैव ज्ञायन्ते स्म।

**सम्प्रति सामाद्युपायान् विनैवामरक्षादिकं कृतवानित्याह**

**जुगोपात्मानमत्रस्तो भेजेधर्ममनातुरः।**
**अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् ॥२१॥**

**अन्वयः**– सः, अत्रस्तः, (सन्) आत्मानं, जुगोप। अनातुरः (सन्) धर्मं, भेजे, अगृध्नुः (सन्) अर्थम्, आददे, असक्तः, (सन्) सुखम्, अन्वभूत्,।

**व्याख्याः**– सः=महाराजोदिलीपः, अत्रस्त्रः=अभीतः सन्, आत्मानम्=शरीरम्, जुगोप=रक्ष, अनातुर=अरूग्णः सन्, धर्मम्=सुकृतम्, भेजे=सिषेवे=(आर्जितवान्), अगृध्नु=अगर्धनः (अलोलुपः) सन्, अर्थम्=वित्तम्, आददे=स्वीकृतवान्, असक्तः= आसक्तिरहितः सन्, सुखम्=आनन्दम्=अनुभूतवान् ।

**भावार्थः**– राजा दिलीपः भयरहितः सन् आत्मरक्षाम् अकरोत् । रोग रहितः सन् धर्म अकरोत् । अलुलोपः सन् धनं संगृहीतवान् । आसक्तिरहितः सन् सुखम् अन्वभूत् ।

**परस्परविरूद्धानामपिगुणानां तत्र साहचर्यमासीदित्याह**

**ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।**
**गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव ॥२२॥**

**अन्वयः**– ज्ञाने, मौनम्, शक्तौ, क्षमा, त्यागे, श्लाघाविपर्ययः, (इत्थम्) तस्य, गुणाः, गुणानुबन्धित्वात्, सप्रसवाः, इव (आसन्) ।

**व्याख्याः**– ज्ञाने= परवृत्तान्तज्ञाने, सत्यपि, मौनम्=वाङ्नियमनम्, शक्तौ= प्रतीकारसामर्थ्येऽपि, क्षमा=अपकारसहनम्, त्यागे=वितरणे सत्यपि, श्लाघाविपर्ययः= (श्लाघायाः विपर्ययः श्लाघाविपर्ययः) आत्मप्रशंसाभावः, इत्थम् तस्य=दिलीपस्य, गुणाः =ज्ञानादयः, गुणानुबन्धित्वात्=(गुणैः अनुबन्धित्वं गुणानुबन्धित्वम् तस्मात्) विरूद्ध-मौनादिगुणसहचारित्वात्, सप्रसवाः=सोदराः, इव=यथा, आसन् ।

**भावार्थः**– राजा दिलीपः अन्येषां दोषादोषवृत्तान्तज्ञाने सत्यपि मौनम् अवलम्बते । अन्यान् जनान् प्रतीकारसामर्थ्येऽपि क्षमां करोति । ब्राह्मणादिभ्यः धनं ददाति, अन्यस्मिन् क्षेत्रे त्यागं च करोति तस्मिन् कार्ये स्वप्रशंसां न करोति श्रोतुमपि नेच्छति । अतः राज्ञः दिलीपस्य ज्ञानादयः गुणाः मौनादयः विरूद्धगुणाश्च एकस्मिन् स्थले एव वर्तन्ते । तस्मात् कारणात् सहोदरसमानाः आसन् ।

**द्विविधं वृद्धत्वं ज्ञानेन वयसा च । अत्र तस्य ज्ञानेन वृद्धत्वमाह**

**अनाकृष्टस्य विषयैर्विद्यानां वारदृश्वनः ।**
**तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना ॥२३॥**

**अन्वयः**– विषयैः, अनाकृष्टस्य, विद्यानां, पारदृश्वनः, धर्मरतेः, तस्य, जरसा, विना वृद्धवत्म्, आसीत् ।

**व्याख्याः**– विषयैः=शब्दादिभिः, अनाकृष्टस्य=(न आकृष्ट अनाकृष्ट तस्य) अवशीकृतस्य, विद्यानाम्=वेदवेदाङ्गादिचतुर्दशशास्त्राणाम्, पारदृश्वनः=अन्तं दृष्टवतः,

धर्मरते: = (धर्मेरतिः यस्य सः धर्मरतिः तस्य) पुण्यानुरागस्य, तस्य = दिलीपस्य, जरसा=जरया विना, वृद्धत्वम्=वार्धकत्, आसीत्=अभूत् ।

**भावार्थः**– तस्य यूनो राज्ञः दिलीपस्य विषयवैराग्यादिज्ञानगुणसम्पत्त्या जरसा विना ज्ञानतो वृद्धमासीत् दिलीपो ज्ञानवृद्ध आसीदित्यर्थः ।

**द्विविधं पितृत्वं रक्षनोत्पादनेन च । अत्र तस्य रक्षणेन पितृत्वमाह**

**प्रजानां विनयाधानाद् रक्षणाद् भरणादपि ।**
**स पिता पितरस्तासां केवलं जन्महेतवः ॥२४॥**

**अन्वयः**– प्रजानां, विनयाधानाद, रक्षणात्, भरणात्, अपि सः, पिता, (अभूत्); तासां पितरः, (तु) जन्महेतवः, केवलम् (आसन्) ।

**व्याख्या:**– प्रजानाम्=जनानाम्, विनयाधानात्= (विनयस्य आधानं तस्मात्) शिक्षाकरणात् (सन्मार्गप्रवर्तनात् इति भावः), रक्षणात्=भयहेतुभ्यः त्राणात् (पालनात् आपन्निवारणादिति भावः), भरणात्=अन्नपानादिभिः पोषणात्, अपि=समुच्चये, सः= पूर्वोक्तः दिलीपः, पिता=जनकः, अभूत्, तासाम्=जनानाम्, पितरः=जनकाः तु जन्महेतवः=जन्ममात्रकर्तारः, केवलम्= मात्रम्, आसना प्रजानां पितरस्तु उत्पत्तिमात्र-कारणानि इति भावः ।

**भावार्थः**– राजा दिलीपः प्रजानां शिक्षणरक्षणपोषणादिकार्येभ्यः पिता (रक्षकः) आसीत् । तासं पितरस्तु केवलम् उत्पत्तिमात्रकारणानि आसन् ।

**स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये ।**
**अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥२५॥**

**अन्वयः**– दण्डयान्, स्थित्यै, दण्डयतः, प्रसूतये, परिणेतुः, मनीषिणः, तस्य, अर्थकामौ, अपि, धर्म, एव, आस्ताम् ।

**व्याख्या:**– दण्डयान् = दण्डनीयान्, स्थित्यै = प्रतिष्ठायै, दण्डयतः=शिक्षयतः, प्रसूतये= सन्तानाय, परिणेतुः=कृतविवाहस्य, मनीषिणः=विदुषः, तस्य=महाराजस्य दिलीपस्य, अर्थकामौ=अर्थकामाख्यौ, अपि धर्म एव=धर्मसंज्ञकपुरुषार्थ एव आस्ताम्= अभूताम् ।

**भावार्थः**– राजा दिलीपः लोकमर्यादापालनाय अपराधकर्तृभ्यः दण्डम् अदात् । सन्तानोत्पत्त्यर्थं विवाहम् अकरोत् । बुद्धिमतः राज्ञः दिलीपस्य अर्थकामौ धर्म एव आस्ताम् ।

**दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।**
**सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥६२॥**

**अन्वयः**– सः, यज्ञाय, गां, दुदोह, मघवा, सस्याय, दुदोह । (एवम्) उभौ, सम्पद्विनिमयेन, भुवनद्वयं, दधतुः ।

**व्याख्याः**–सः=महाराजो दिलीपः, यज्ञाय=यज्ञार्थम्, गाम्=पृथिवीम्, दुदोह=अधोक्, मघवा=देवेन्द्रः, सस्याय=सस्यं वर्धयितुम्, दिवम्=स्वर्गम् दुदोह । एवम्, उभौ=इन्द्रदिलीपौ, सम्पद्विनिमयेन=(सम्पदः विनिमयः सम्पद्विनिमयः, तेन) परस्परमादानप्रदानाभ्याम्, भुवनद्वयम्=(भुवनयोः द्वयम् भुवनद्वयम्) लोकद्वयम् (स्वर्लोकं मर्त्यसोकं च) दधतुः=पुपुषतुः ।

**भावार्थः**– महाराजः दिलीपः यज्ञार्थम् प्रजाभ्यः षष्ठांशरूपं करम् अग्रहीत् । इन्द्रः सस्यं वर्धयितु स्वर्गलोकात् पृथिवीलोके वृष्टिम् अकरोत् । इत्थम् इन्द्रदिलीपौ परस्परादानप्रदानरूपेण स्वर्लोकं मर्त्यलोक च पालयामासतुः ।

**न किलानुयषुस्तस्य राजानो रक्षितुर्यशः ।**
**व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥२७॥**

**अन्वयः**– राजानः, रक्षितुः तस्य, यशः, न, अनुययुः, किल । यत्, तस्करता, परस्वेभ्यः, व्यावृता (सती) श्रुतौ स्थिता ।

**व्याख्याः**– राजानः=अन्येनृपाः, रक्षितुः=भयेभ्यस्त्रातुः, रक्षकस्य, तस्य=राज्ञः दिलीपस्य, यशः=कीर्तिम्, न=नहि=अनुययुः=अनुचक्रुः, किल=निश्चयेन, यत्=यस्मात् कारणात्, तस्करता=चौर्यम्, परस्वेभ्यः =परधनेभ्यः, व्यावृत्ता=निवृत्ता सती, श्रुतौ=तद् वाचकशब्दे, स्थिता=प्रवृत्ता सती, श्रुतौ= वाचकशब्दे स्थिताः प्रवृत्ता ।

**भावार्थः**– अन्ये राजानः दिलीपस्य यशः न अनुचक्रुः । किमिति दिलीपस्य राज्यस्थाः जनाः अन्यधनेभ्यः पराङमुखाः आसन् । अत एव "तस्करः" शब्दस्तु श्रुतावेवासीत् लोकव्यवहारे तु न प्रचलितोऽभूत् ।

**द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम् ।**
**त्याज्यो दुष्टः प्रियोऽप्यासीदङगुलीवोरगक्षता ॥२८॥**

**अन्वयः**–शिष्टः, द्वेष्यः, अपि, आर्तस्य, औषधं, यथा, तस्य, सम्मतः (आसीत्) । दुष्टः प्रियः, अपि, उरगक्षता, अंगुली, इव तस्य, त्याज्यः, आसीत् ।

**व्याख्या:**– शिष्टः=सज्जनः, द्वेष्यः=शत्रुः अपि, आर्तस्य=रोगिणः, औषधम्=भेषजम्, यथा=इव, तस्य=राज्ञः दिलीपस्य, सम्मतः=अनुमतः, आसीत्। दुष्टः=दुर्जनः, प्रियः=प्रेमास्पदीभूतः अपि उरगक्षता= (उरगेण क्षता उरगक्षता) सर्पदंष्टा, अंगुली=करशाखा इव, तस्य=दिलीपस्य, त्याज्यः=त्यक्तुं योग्यः, आसीत्=अभूत्।

**भावार्थः**– सज्जनः शत्रुरपि रोगिणः औषधम् इव दिलीपस्य प्रियः आसीत्। दुर्जनः प्रियः अपि सर्पदंष्टा अङ्गुलीव त्याज्यः आसीत्। राज्ञः दिलीपस्य सुजनः बन्धुः असज्जनः शत्रुः आसीत् इति तात्पर्यम् ।

**तस्य परोपकारित्वमाह**

**तं वेधा विदधे नूनं महाभूतसमाधिना ।**
**तथा हि सर्वे तस्यासन् परार्थैकफला गुणाः ॥२९॥**

**अन्वयः**– वेधाः, तं, महाभूतसमाधिना, नूनम्, विदधे, । तथा, हि, तस्य, सर्वे, गुणाः, परार्थैकफलाः, आसन् ।

**व्याख्या:**– वेधाः=स्रष्टा, तम्=दिलीपम्, महाभूतसमाधिना (महाभूतानां यः समाधिस्तेन) पृथिव्यप्तेजोवाय्वाकाशरूपाणां महाभूतानां कारणसामग्र्या, नूनम्=ध्रुवम्, विदधे=ससर्ज, तथा=तेन प्रकारेण, हि तस्य=दिलीपस्य, सर्वे=सकलाः, गुणाः=दयादाक्षिण्यादयः, परार्थैकफलाः= (परस्य अर्थः परार्थः परार्थः एव एकं फलं येषां ते) आसन् ।

**भावार्थः**– यथा ब्रह्मा दिलीपं पृथिव्यादिपञ्चमहाभूतसामाग्र्या विदधे । तथैव महाराजदिलीपस्य दयादाक्षिण्यादिगुणाः अन्येषां जनानां प्रयोजनसिद्ध्यर्थम् एव अभूवन् ।

**स वेलावप्रवलयां परिखीकृतसागराम् ।**
**अनन्यशासनामुर्वी शशासैकपुरीमिव ॥३०॥**

**अन्वयः**– सः, वेलावप्रवलयां, परिखीकृतसागराम्, अनन्यशासनाम् उर्वीम्, एकपुरीम्, इव, शशास ।

**व्याख्या:**– सः = दिलीपः, वेलावप्रवलयाम् = (वेला एव वप्रवलयाः यस्याः सा ताम्) सागरतटप्राकारवेष्टनाम्, परिखीकृतसागराम् = (परितः खाताः परिखाः नपरिखाः अपरिखाः, अपरिखाः परिखाः सम्पद्यमानाः कृताः इति परिखीकृताः, परिखीकृताः सागरा यस्याः सा ताम्) दुर्गवेष्टनीकृतसमुद्राम्, अनन्यशासनाम्= (अविद्यमा-

नम् अन्यस्य शासन यस्यास्ताम्) स्वेतरशासनरहिताम्, उर्वीम्=पृथिवीम्, एकपुरीम् =एकनगरीम् इव शशास=शासितवान् ।

भावार्थः– राजा दिलीपः समुद्रपर्यन्तसीमां समस्तां पृथिवीम् एकनगरीम् इव शासितवान् ।

**तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ।**
**पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥३२॥**

**अन्वयः**– तस्य मगधवंशजा दाक्षिण्यरूढेन नाम्ना अध्वरस्य पत्नी दक्षिणा इव सुदक्षिणा इति (पत्नी) आसीत् ।

**व्याख्याः**– तस्य=राज्ञः, दिलीपस्य, मगधवंशजा (मगधवंशे जाता) मगधवंशोत्पन्ना, दाक्षिण्यरूढेन=(दक्षिणस्य भावः दाक्षिण्यं, तेन रूढं दाक्षिण्यरूढं तेन दाक्षिण्यरूढेन) परछन्दानुवर्तनाख्येन, नाम्ना=नामकथनेन, अध्वरस्य=यज्ञस्य, पत्नी=भार्या, दक्षिणा=तदाख्या इव, सुदक्षिणा इति सुदक्षिणा इति नाम्ना प्रसिद्धा, पत्नी आसीत्=अभूत्।

**भावार्थः**– राज्ञः दिलीपस्य मगधकुलोत्पन्ना सुदक्षिणा नाम्नी धर्मपत्नी जनानाम्, इच्छानुकूलकरणेन यज्ञस्य पत्नी दक्षिणासमाना आसीत् ।

**कलत्रवन्तमात्मानमवरोधे महत्यपि ।**
**तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ॥३२॥**

**अन्वयः**– वसुधाधिपः, अवरोधे, महत्यपि, मनस्विन्या, तथा, लक्ष्म्या, च आत्मानं, कलत्रवन्तं, मेने ।

**व्याख्याः**– वसुधाधिपः=(वसुधायाः अधिपः वसुधाधिपः) पृथिवीपतिः, अवरोधे= अन्तः पुरे (स्त्री–समूहे), महत्यपि=बाहुल्ये सत्यपि, मनस्विन्या=दृढचित्तया, तया= सुदक्षिणया, लक्ष्म्या=राज्यश्रिया च, आत्मानम्,=स्वम्, कलत्रवन्तम्=भार्यावन्तम्, मेने=ज्ञातवान् ।

**भावार्थः**– दिलीपस्य अन्तःपुरे बह्वय महिष्यः आसन् तथापि पतिचित्तानुसारिण्या सुदक्षिणया राज्यलक्ष्म्या च दिलीपः स्वं कलत्रवन्तं मेने।

**तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः ।**
**विलम्बितफलैः कालं स निनाय मनोरथैः ॥३३॥**

**अन्वयः**– सः, आत्मानुरूपायां, तस्याम्, आत्मजन्मसमुत्सुकः, (सन्) विलम्बितफलैः, मनोरथैः, कालं, निनाय ।

**व्याख्या:**– सः=महाराजः दिलीपः, आत्मानुरूपायाम्=(आत्मनः अनुरूपा आत्मानुरूपा तस्याम्) स्वसदृश्याम्, तस्याम्=सुदक्षिणायाम्, आत्मजन्मसमुत्सुकः (आत्मनः जन्म आत्मजन्म आत्मजन्मनि समुत्सुक आत्मजन्मसमुत्सुकः) आत्मनो जन्मनि पुत्ररूपेण उत्पत्तौ समुत्सुकः (समुत्कण्ठितः) सन् विलम्बितफलैः=(विलम्बित फलं येषां तैः) विलम्बपरिणामैः, मनोरथैः=आशाभि (कदा मे पुत्रो भविष्यतीति मनोरथैः) कालम्=समयम्, निनाय=यापयामास ।

**भावार्थः**– दिलीपः स्वसदृश्यां सुदक्षिणायाम् आत्मजन्मनि पुत्ररूपेण उत्पत्तौ समुत्कण्ठितः सन् कदा मे पुत्रो भविष्यतीति मनोरथैः समयं यापयामास ।

**सन्तानार्थाय विधये स्वभुजादवतारिता ।**
**तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ॥३४॥**

**अन्वयः**– तेन, सन्तानार्थाय विधये, स्वभुजात्, अवतारिता, जगतः, गुर्वी, धूः, सचिवेषु, निचिक्षिपे ।

**व्याख्या:**– तेन=राज्ञा दिलीपेन, सन्तानार्थाय=(सन्तानः अर्थः यस्य सः सन्तानार्थः तस्मै) पुत्रप्रयोजनाय, विधये=अनुष्ठानाय, स्वभुजात्=निजवाहोः, अवतारिता=अवरोपिता । जगतः=लोकस्य, गुर्वी=दुर्वहा, धूः=भारः, सचिवेषु=मन्त्रिषु निचिक्षिपे=निहिता ।

**भावार्थः**– राज्ञा दिलीपेन पुत्रप्राप्त्यर्थम् तपस्याकरणाय गन्तुं स्वभुजात् राज्यस्य शासनभारम् अवतार्य गुरुभारः सचिवेषु संस्थापितः ।

**अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया ।**
**तौ दम्पती वसिष्ठस्य गुरोर्जग्मतुराश्रमम् ॥३५॥**

**अन्वयः**– अथ, पुत्रकाम्यया, प्रयतौ, तौ, दम्पती, विधातारम्, अभ्यर्च्य, गुरोः, वसिष्ठस्य, आश्रमम्ः, जग्मतुः ।

**व्याख्या:**– अथ=मन्त्रिषु राज्यभारसंस्थापितानन्तरम्, पुत्रकाम्यया=आत्मनः पुत्रेच्छया, प्रयतौ=पूतौ, तौ=उभौ, दम्पती=जायापती सुदक्षिणादिलीपौ, विधातारम्=ब्रह्माणम्, अभ्यर्च्य=सम्पूज्य, गुरोः=कुलगुरोः, वसिष्ठस्य=तन्नामकस्य मुनेः, आश्रमम्=तपोवनम् जग्मतुः=ययतुः (पुत्रप्राप्त्युपायाऽपेक्षयेति) ।

**भावार्थः**– राज्यभारावतारानन्तरं, पुत्रेच्छया, पवित्रीभूतौ, सुदक्षिणादिलीपौ, ब्रह्माणं सम्पूज्य, कुलगुरोः, वसिष्ठस्य, आश्रमं, जग्मतुः ।

**स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।**
**प्राविषेण्यं पयोवाहं विद्युदैरावताविव ॥३६॥**

**अन्वयः**– स्निग्धगम्भीरनिर्घोषम्, एकं, स्यन्दनं, प्रावृषेण्यम्, पयोवाहं, विद्युदैरावतौ, इव, आस्थितौ (तौ जग्मतुः) ।

**व्याख्याः**– स्निग्धगम्भीरनिर्घोषम् = ( स्निग्धः गम्भीरः निर्घोषः यस्य, तम्) मनोरमगम्भीरशब्दम्, एकम् = अद्वितीयम्, स्यन्दनम् = रथम्, प्रावृषेण्यम् = (प्रावृषि भवः प्रावृषेण्यः तम्) वर्षाकालिकम्, पयोवाहम् = मेघम्, विद्युदैरावतौ (विद्युच्च ऐरावतश्च विद्युदैरावतौ) तडित् अभ्रमातङ्गौ इव, आस्थितौ = आरूढौ, तौ = सुदक्षिणादिलीपौ, जग्मतुः।

**भावार्थः**– सुदक्षिणादिलीपौ मनोरमगम्भीरशब्दयुक्तम् अद्वितीयं वर्षाकालिकमेघसमानरथम् आरुह्य विद्युदैरावतौ इव गुरोः वसिष्ठस्य आश्रमं जग्मतुः ।

**मा भूदाश्रमपीडेति परिमेयपुरः सरौ ।**
**अनुभावविशेषात्तु सेनापरिवृताविव ॥३७॥**

**अन्वयः**– आश्रमपीडा, माभूत्, इति, परिमेयपुरःसरौ, अनुभावविशेषात्, तु, सेनापरिवृतौ इव (तौ जग्मतुः)

**व्याख्याः**– आश्रमपीडा = ( आश्रमस्य पीडा आश्रमपीडा) वसिष्ठाश्रमस्य बाधा, माभूत् = न भवतु इति हेतोः, परिमेयपुरःसरौ = (परिमातुं योग्याः परिमेयाः, परिमेयाः पुरः सराः ययोः तौ परिमेयपुरःसरौ) मितपरिचरौ, अनुभावविशेषात् = (अनुभावस्य विशेषः अनुभावविशेषः तस्मात्) तेजोविशेषात्, तु = किन्तु, सेनापरिवृतौ = सैन्यसमन्वितौ इव तौ = सुदक्षिणादिलीपौ, जग्मतुः ।

**भावार्थः**– सुदक्षिणादिलीपौ प्रस्थानकाले वसिष्ठाश्रमवासिनां जनानां बाधा मा भूत् इति कारणात् परिमितिपरिचरान् गृहीत्वा गच्छन्तौ अपि तेजोविशेषात् सैन्यसमन्वितौ इव शुशुभाते ।

**सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः ।**
**पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥३८॥**

**अन्वयः**– सुखस्पर्शैः, शालनिर्यासगन्धिभिः, पुष्परेणूत्किरैः, आधूतवनराजिभिः, वातैः, (तौ जग्मतुः)।

**व्याख्याः**– सुखस्पर्शैः=(सुखः स्पर्शः येषां तैः)आनन्दकारकस्पर्शैः, शालनिर्यासगन्धिभिः=(शालानां निर्यासाः शालनिर्यासाः, शालनिर्यासानां गन्धाः शालनिर्यासगन्धाः, सन्ति येषां ते शालनिर्यासगन्धिनः तैः) सर्जतरुनिस्यन्दगन्धवद्भिः, पुष्परेणूत्किरैः=(पुष्पाणां रेणवः पुष्परेणवः, उत्किरन्ति इति उत्किराः पुष्परेणूनाम् उत्किराः पुष्परेणूत्किराः तैः) पुष्परागविक्षेपकैः, आधूतवनराजिभिः= (आधूताः वनराजयः यैः तैः) ईषत्कम्पितवनपङ्क्तिभिः, वातैः=पवनैः, सेव्यमानौ=परिचर्यमाणौ, (तौ सुदक्षिणादिलीपौ, वसिष्ठाश्रमं जग्मतुः)।

**मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।**
**षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः ॥३९॥**

**अन्वयः**– रथनेमिस्वनोन्मुखैः, शिखण्डिभिः, द्विधाः, भिन्नाः, षड्जसंवादिनीः, मनोभिरामाः, केकाः, शृण्वन्तौ। (तौ जग्मतुः)।

**व्याख्याः**– रथनेमिस्वनोन्मुखैः = (रथस्य नेमी रथनेमी, तयोः स्वनः रथनेमिस्वनः, तेन उन्मखाः, तैः रथनेमिस्वनोन्मुखैः) रथचक्रप्रान्तनिनादोन्नमितोर्ध्वमुखैः, शिखण्डिभिः= मयूरैः, द्विधाः=द्विप्रकारकाः, भिन्नाः=भेदमापन्नाः षड्जसंवादिनीः= (षड्जेन संवादिनीः) सदृशीः, मनोभिरामाः=चित्तप्रियाः, केकाः=मयूरवाणीः, शृण्वन्तौ= आकर्णयन्तौ (तौ सुदक्षिणादिलीपौ वसिष्ठाश्रमं जग्मतुः)।

**भावार्थः**– वसिष्ठाश्रमं गच्छन्तौ सुदक्षिणादिलीपौ रथशब्दोन्मुखैः मयूरैः द्विप्रकारकाः भिन्नाः षड्जसंवादिनीः चित्तप्रियाः मयूरवाणीः शृण्वन्तौ गुरोः, आश्रमं जग्मतुः।

**परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु ।**
**मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ॥४०॥**

**अन्वयः**– अदूरोज्झितवर्त्मसु, स्यन्दनाबद्धदृष्टिषु, मृगद्वन्द्वेषु, परस्पराक्षिसादृश्यं, पश्यन्तौ (तौ जग्मतुः)।

**व्याख्याः**– अदूरोज्झितवर्त्मसु=(अदूरं यथा स्यात् तथा उज्झितं वर्त्म यैः, तानि अदूरोज्झितवर्त्मानि तेषु) सन्निकटत्यक्तमार्गेषु, स्यन्दनाबद्धदृष्टिषु=(स्यन्दने आबद्धा दृष्टिः यैः तेषु) रथाबद्धनयनेषु, मृगद्वन्द्वेषु=हरिणमिथुनेषु, परस्पराक्षिसादृश्यम्=

(अक्षणोः सादृश्यम् अक्षिसादृश्यम् परस्परम् च तत् अक्षिसादृश्यम् परस्पराक्षिसादृश्यम् अन्योन्य नेत्रसरूपताम्, पश्यन्तौ=अवलोकयन्तौ, तौ= पूर्वोक्तौ, उभौ= प्रस्थितौ।

**भावार्थः**– सुदक्षिणादिलीपौ रथम् आरुह्य वसिष्ठाश्रमं गच्छन्तौ मार्गस्य समीपे स्थित्वा रथे आबद्धनयनेषु हरिणमिथुनेषु परस्परनेत्रसादृश्यं पश्यन्तौ प्रस्थितवन्तौ ।

**श्रेणीबन्धाद् वितन्वद्भिरस्तम्भां तोरणस्रजम् ।**
**सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ।।४१।।**

**अन्वयः**– श्रेणीबन्धात्, अस्तम्भो, तोरणस्रजं, वितन्वद्भिः, कलनिर्ह्रादैः, सारसैः, क्वचित्, उन्नमिताननौ, (तौ वसिष्ठाश्रमं जग्मतुः) ।

**व्याख्याः**– श्रेणीबन्धात् =(श्रेण्याः बन्धः श्रेणीबन्धः, तस्मात्) पङ्क्तिबन्धात्, अस्तम्भाम् =आधारस्तम्भरहिताम्, तोरणस्रजम्,=बहिर्द्वारमालाम्, वितन्वद्भिः= विरचयद्भिः, कलनिर्ह्रादैः =अव्यक्तमधुरध्वनिभिः, सारसैः=पक्षिविशेषैः, क्वचित् = कस्मिंश्चित्, (स्थाने) उन्नमिताननौ= (उन्नमितम् आननं ययोः तौ) ऊर्ध्वीकृतमुखौ, तौ उभौ वसिष्ठाश्रमं जग्मतुः।

**भावार्थः**– आकाशे श्रेणीबन्धात् स्तम्भरहितां तोरणमालां विरचयताम् अव्यक्तमधुरध्वनीनां सारसपक्षिणां शोभां द्रष्टुं कस्मिंश्चित् स्थाने ऊर्ध्वीकृतमुखौ सुदक्षिणादिलीपौ वसिष्ठाश्रमं जग्मतुः।

**पवनस्यानुकूलत्वात् प्रार्थनासिद्धिशंसिनः ।**
**रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ।।४२।।**

**अन्वयः**–प्रार्थनासिद्धिशंसिनः, पवनस्य, अनुकूलत्वात्, तुरगोत्कीर्णैः, रजोभिः, अस्पृष्टालकवेष्टनौ (तौ जग्मतुः)।

**व्याख्याः**– प्रार्थनासिद्धिशंसिनः =(प्रार्थनायाः सिद्धिः प्रार्थनासिद्धिः तां शंसितुं शीलं यस्य सः प्रार्थनासिद्धिशंसी, तस्य) मनोरथसिद्धिसूचकस्य, पवनस्य=वातस्य, अनुकूलत्वात्= (अनुकूलस्य भावः अनुकूलत्वम् तस्मात्) गन्तव्यादिगभिमुखत्वात्, तुरगोत्कीर्णैः=अश्वखुरोत्क्षिप्तैः, रजोभिः=धूलिभिः। अस्पृष्टालकवेष्टनौ=(अस्पृष्टा अलका वेष्टनम् ययोः तौ तथोक्तौ) असम्पृक्तचूर्णकुन्तलोष्णीषौ, (तौ सुदक्षिणादिलीपौ वसिष्ठाश्रमं जग्मतुः)।

**भावार्थः**– मनोरथसिद्धिसूचकस्य पवनस्य अनुकूलत्वाद् अश्वखुरोत्क्षिप्तैः धूलिभिः असम्पृक्तचूर्णकुन्तलौ सुदक्षिणादिलीपौ वसिष्ठाश्रमं जग्मतुः।

**सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् ।**
**आमोदमुपजिघ्रन्तौ स्वनिःश्वानुकारिणम् ॥४३॥**

**अन्वयः**– सरसीषु, वीचिविक्षोभशीतलम्, स्वनिःश्वासानुकारिणम्, अरविन्दानाम्, आमोदम्, उपजिघ्रन्तौ (तौ जग्मतुः) ।

**व्याख्याः**– सरसीषु=तडागेषु, वीचिविक्षोभशीतलम् = (वीचीनां विक्षोभः वीचिविक्षोभः, तेन शीतलः तम्) तरङ्गसंघटनशीतलम्, स्वनिःश्वासानुकारिणम्= (स्वस्य निःश्वासः स्वनिःश्वासः, तम्, अनुकर्तुं शीलम् अस्य इति स्वनिःश्वासानुकारी, तम्) आत्मनिःश्वासानुकरणशीलम्, अरविन्दानाम्=कमलानाम्, आमोदम्=सौरभम्, उपजिघ्रन्तौ=घ्राणेन गृह्णन्तौ (तौ सुदक्षिणादिलीपौ जग्मतुः) ।

**भावार्थः**– सुदक्षिणादिलीपौ माग तडागेषुतरङ्गसंघट्टनशीतलं स्वनिःश्वासानुकरण-शीलं कमलानां सौरभं घ्राणेन गृह्णन्तौ वसिष्ठाश्रमं प्रस्थितौ ।

**ग्रामेष्वात्मविसृष्टेषु यूपचिन्हेषु यज्वनाम् ।**
**अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ॥४४॥**

**अन्वयः**– आत्मविसृष्टेषु, यूपचिन्हेषु, ग्रामेषु, यज्वनाम्, अर्घ्यानुपदम्, अमोघाः, आशिषः, प्रतिगृह्णन्तौ (तौ आश्रमं जग्मतुः) ।

**व्याख्याः**–आत्मविसृष्टेषु=स्वदत्तेषु, यूपचिन्हेषु= यज्ञसम्बन्धिपशुबन्धार्थकदारु-विशेषेषु, ग्रामेषु=संवस्थेषु, यज्वानाम् =याज्ञिकानाम्, अर्घ्यानुपदम्=अर्घ्यस्वीकारानन्तरम्, अमोघाः=अनिष्फलाः, आशिषः=आशीर्वादान्, प्रतिगृह्णन्तौ=स्वीकुर्वन्तौ (तौ दम्पती वसिष्ठाश्रमं जग्मतुः) ।

**हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ।**
**नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥४५॥**

**अन्वयः**– हैयङ्गवीनम्, आदाय, उपस्थितान्, घोषवृद्धान्, वन्यानाम्, मार्गशाखिनाम् नामधेयानि, पृच्छन्तौ (तौ जग्मतुः) ।

**व्याख्याः**– हैयङ्गवीनम्=नवनीतम्, आदाय=गृहीत्वा, उपस्थितान्=समागतान्, घोषवृद्धान्=आभीरपल्लीरथविरान्, वन्यानाम्= (वने भवाः वन्याः तेषाम्) वनभवानाम्, मार्गशाखिनाम्= (मार्गस्य शाखिनः मार्गशाखिनः तेषाम्) वर्त्मवृक्षाणाम्, नामधेयानि= नामानि, पृच्छन्तौ=जिज्ञासमानौ, (तौ सुदक्षिणादिलीपौ जग्मतुः) ।

भावार्थः– आश्रमगमनमार्गे सुदक्षिणादिलीपौ स्यागतार्थं नवनीतं गृहीत्वा समुपस्थितान् घोषवृद्धान् वनोत्पन्नानां मार्गस्थितानां वृक्षाणां नामानि पृच्छन्तौ (वसिष्ठाश्रमं जग्मतुः) ।

**काप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेषयोः ।**
**हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥४६ ॥**

**अन्वयः–** व्रजतोः, शुद्धवेषयोः, तयोः, हिमनिर्मुक्तयोः, चित्राचन्द्रमसोः, इव, योगे (सति) कापि, अभिख्या, आसीत् ।

**व्याख्याः–** व्रजतोः=गच्छतोः, शुद्धवेषयोः=स्वच्छनेपथ्योः, तयोः=सुदक्षिणादिलीपयोः, हिमनिर्मुक्तयोः= (हिमात् निर्मुक्तौ हिमनिर्मुक्तौ तयोः) तुषारत्यक्तयोः, चित्राचन्द्रमसोः=चित्राख्यतारा–चन्द्रयोः, इव=यथा, योगे=सङ्गतौ सति कापि= अनिर्वाच्या, अभिख्या=शोभा, आसीत्=अभवत् ।

**भावार्थः–** रमणीयवनमार्गेण वसिष्ठाश्रमं प्रतिगच्छतोः शुद्धवेषयोः सुदक्षिणादिलीपयोः अनिर्वचनीय तादृशी शोभा अभूत् यथा चैत्रपूर्णिमायां हिमनिर्मुक्तयोः चित्राचन्द्रमसोः शोभा भवति ।

**तत्तद् भूमिपतिः पत्न्यै दर्शयन् प्रियदर्शनः ।**
**अपि लङ्घितमध्वानं बुबधे न बुधोपमः ॥४७॥**

**अन्वयः–** प्रियदर्शनः, बुधोपमः, भूमिपतिः, पत्न्यै, तत्तत्, दर्शयन्, लंघितम् अपि, अध्वानं, न, बुबुधे ।

**व्याख्याः–** प्रियदर्शनः= (प्रियं दर्शनं यस्य सः) हृद्यावलोकनः, बुधोपमः= (बुधः उपमा यस्य सः) चन्द्र सदृशः, भूमिपति=पृथिवीशः, पत्न्यै=भार्यायै, तत्तत्=अद्भुतं दर्शनीयं वस्तु, दर्शयन्=अवलोकयन्, लंघितम्=अतिवाहितम्, अपि अध्वानम्=मार्गम् न=नहि, बुबुधे=ज्ञातवान् ।

**भावार्थः–** सुन्दरदर्शनः बुधसदृशो दिलीपः मार्गस्थिते वने दर्शनीयं वस्तु सुदक्षिणायै दर्शयन् लंघितमपि मार्गं न ज्ञातवान्, सुखेन मार्गं यापयामासेत्यर्थः ।

**स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः ।**
**सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥४८॥**

**अन्वयः–**दुष्प्रापयशाः, श्रान्तवाहनः, महिषीसखः, सः, सायं, संयमिनः, तस्य, महर्षेः, आश्रम्, प्रापत् ।

**व्याख्या** :– दुष्प्रापयशाः = (दुःखेन प्राप्तुं शक्यं दुष्प्रापम्, दुष्प्रापं यशः यस्य सः) अन्यदुर्लभकीर्तिः, श्रान्तवाहनः = परिश्रान्ततुरङ्गः, महिषीसखः = पत्नीसहचरः, सः = दिलीपः, सायम् = सन्ध्यासमये, संयमिनः = इन्द्रियनिग्रहवतः, तस्य = पूर्वोक्तस्य, (कुलगुरोः महर्षेः वसिष्ठस्य) आश्रमम् = तपोवनम् प्रापत् = प्राप्तवान् ।

**भावार्थ**:– अन्यदुर्लभकीर्तिः महिषीसखः दिलीपः शोभायुक्तं महारण्यम् उल्लंघ्य अयोध्यातः सन्ध्याकाले संयमिनः कुलगुरोः वसिष्ठस्य आश्रमं प्रापत् ।

**तमाश्रमं विशिनष्टि**

**वनान्तरादुपावृत्तैः समित्–कुश–फलाहरैः ।**
**पूर्यमाणमदृश्याग्नि–प्रत्युद्यातैस्तपस्विभिः ॥४९॥**

**अन्वयः**– वनान्तरात्, उपावृत्तैः, समित्–कुश–फलाहरैः, अदृश्याग्निप्रत्युद्यातैः, तपस्विभिः, पूर्यमाणम् (आश्रमं प्रापत्) ।

**व्याख्या**:– (सपत्नीको दिलीपः) वनान्तरात् = (अन्यत् वनमिति वनान्तरं तस्मात्) अन्यस्माद्वनात्, उपावृत्तैः = प्रत्यावृत्तैः, समित्–कुश–फलाहरैः = समिधश्च कुशाश्च फलानि चाहर्तुं शीलं येषामिति समित्कुशफलाहराः तैः) इध्म–दर्भफलाऽऽहरणशीलैः, अदृश्याग्निप्रत्युद्यातैः = (अदृश्यैः अग्निभिः प्रत्युद्याताः तैः) अदर्शनीयवैतानिकाऽनल–प्रत्युद्गतैः, तपस्विभिः = तापसैः, पूर्यमाणम् = व्याप्तम् (महर्षेः वसिष्ठस्य आश्रमं प्रापत्)

**भावार्थ**:– अन्यस्मात् वनात् प्रत्यागतैः समित् – कुश–फलाहरैः अदृश्याग्निभिः प्रत्युद्गतैः तपस्विभिः व्याप्तं वसिष्ठाश्रमं सन्ध्याकाले सुदक्षिणासहितः दिलीपः प्रापत् ।

**आमस्थमृगवर्णनमित्याह**

**आकीर्णमृषीपत्नीनामुटजद्वाररोधिभिः ।**
**अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ॥५०॥**

**अन्वयः**– नीवारभागधेयोचितैः, उटजद्वाररोधिभिः, ऋषिपत्नीनाम्, अपत्यैः इव, मृगैः, आकीर्णम् (महर्षेः, आश्रमं सायं प्रापत्) ।

**व्याख्या**:– दिलीपः (कर्ता) नीवारभागधेयोचितैः = (नीवाराणां भागधेयं नीवार भागधेयम् तस्य उचिताः तैः) मुनिधान्यांशयोग्यैः, उटजद्वाररोधिभिः = (उटजानां द्वाररोधिभिः उटजद्वाररोधिभिः) पर्णशालाद्वारावरोधकैः, ऋषिपत्नीनाम् = (ऋषीणां पत्न्यः ऋषिपत्न्यः, तासाम्) मुनिभार्याणाम्, अपत्यैः = आत्मजैः इव, मृगैः = हरिणैः, आकीर्णम् = व्याप्तम् (वसिष्ठाश्रमं सपत्नीको दिलीपः सायं प्रापत्) ।

**भावार्थः**– पर्णकुटीद्वारावरोधकैः नीवारनामकधान्यांशयोग्यैः ऋषिपत्नीनां पुत्रैः इव मृगैः व्याप्तं वसिष्ठाश्रमं सपत्नीकः दिलीपः सायं प्रापत् ।

**सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ।**
**विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् ॥५१॥**

**अन्वयः**– मुनिकन्याभिः, सेकान्ते, आलवालाम्बुपायिनां, विहङ्गानां, विश्वासाय, तत्क्षणोज्झितवृक्षकम् (सायं महर्षेः, आश्रमं प्रापत्) ।

**व्याख्याः**– मुनिकन्याभिः=ऋषिकन्याभिः,सेकान्ते=वृक्षमूलसेचनावसाने, आलवालाम्बुपायिनाम्=(आलवालेषु अम्बु आलवालाम्बु, आलवालाम्बुपातुं शीलं येषां ते आलवालाम्बुपायिनः, तेषाम् आलवालाम्बुपायिनाम्) जलावापप्रदेशजलपानशीलानाम् विहङ्गानाम्=पक्षिणाम्, विश्वासाय=विश्रम्भाय, तत्क्षणोज्झितवृक्षकम्=(तत्क्षणे उज्झिता वृक्षका यस्मिन् तम्) तत्सेचनसमयपरित्यक्तह्रस्वपादपम् (महर्षेः, आश्रमं सपत्नीको महाराजः सायं प्रापत्) ।

**भावार्थः**– आश्रमे मुनिकन्याभिः पुष्पवाटिकासु जलसेचनानन्तरं पक्षिणाम् आलवालाम्बुपानाय विश्वासार्थं वृक्षसेकस्थानं त्यक्तम् । राजा दिलीपः सपत्नीकः तादृशं गुरोः आश्रमं प्रापत् ।

**आतपात्ययसंक्षिप्तनीवारासु निषादिभिः ।**
**मृगैर्वर्तितरोमन्थमुटजाङ्गनभूमिषु ॥५२॥**

**अन्वयः**– आतपात्ययसंक्षिप्तनीवारासु, उटजाङ्गनभूमिषु, निषादिभिः, मृगैः, वर्तितरोमन्थम् (आश्रमं सायं प्रापत्) ।

**व्याख्याः**– आतपात्ययसंक्षिप्तनीवारासु=(आतपस्य अत्यये संक्षिप्ताः नीवाराः यासु तासु) सूर्यास्ते राशीकृतधान्यासु, उटजाङ्गनभूमिषु=(उटजानाम् अङ्गनभूमिषु) पर्णशालाजिरभूभागेषु, निषादिभिः=उपविष्टैः, मृगैः=हरिणैः, वर्तितरोमन्थम्=कृतचर्वितचर्वणम् (आश्रमं सायं प्रापत्) ।

**भावार्थः**– सूर्येऽस्तं गते राशीकृतधान्यासु पर्णशालाङ्गनभूमिषु उपविष्टैः मृगैः चर्वितचर्वणम् आश्रम सपत्नीकः दिलीपः सायं प्रापत् ।

**अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान् ।**
**पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः ॥५३॥**

**अन्वयः** – अभ्युत्थिताग्निपिशुनैः, पवनोद्धूतैः, आहुतिगन्धिभिः, धूमैः, आश्रमोन्मुखान्, अतिथीन्, पुनानम् (आश्रमं सायं प्रापत्) ।

**व्याख्याः**– अभ्युत्थिताग्निपिशुनैः = (अभ्युत्थिताः ये अग्नयः, तेषाम् पिशुनैः) अज्वलितवह्निसूचकैः, पवनोद्धूतैः = वातोत्क्षिप्तैः, आहुतिगन्धिभिः = चरुपुरोडासादिहवनीयगन्धयुक्तैः, धूमैः = धूम्रैः, आश्रमोन्मुखान् = वसिष्ठाश्रममागन्तुं, समुत्सुकान्, अतिथीन् = आगन्तुकान्, पुनानम् = पवित्रीकुर्वाणाम् (आश्रमं सायं प्रापत्) ।

**भावार्थः**– आश्रमं परितः प्रज्वलिताग्निसूचकैः पवनोत्क्षिप्तैः आहुतिगन्धिभिः धूमैः वसिष्ठाश्रमे आगन्तुं समुत्सुकान् अतिथीन् पवित्रीकुर्वाणम् आश्रमं सपत्नीकः दिलीपः सायं प्रापत् ।

**अथ यन्तारमादिश्य धुर्यान् विश्रामयेति सः ।**
**तामवारोहयत् पत्नीं रथादवततार च ॥५४॥**

**अन्वय**:– अथ, सः, यन्तारं, धुर्यान् विश्रामय, इति आदिश्य,, तां पत्नीं, रथात्, अवारोहयत्, अवततार च ।

**व्याख्याः**–अथ = आश्रमप्राप्त्यनन्तरम्, सः = राजा, यन्तारम् = सारथिम्, धुर्यान् = रथाश्वान्, विश्रामय = विनीतश्रमान् कुरू, इति = इत्थम्, आदिश्य = आज्ञाप्य, ताम् = पूर्वोक्ताम्, पत्नीम् = भार्याम्, सुदक्षिणामिति यावत् । रथात् = स्यन्दनात्, अवारोहयत् = अवतारितवान्, अवततार = अवतीर्णश्च ।

**भावार्थः**–दिलीपः वसिष्ठाश्रमप्राप्त्यनन्तरं सारथिं रथाश्वान् विश्रामय इति आदिश्य रथात् सुदक्षिणाम् अवतारितवान्, स्वश्च रथात् अवतीर्णः ।

**तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः ।**
**अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥५५ ॥**

**अन्वयः**– सभ्याः, गुप्ततमेन्द्रियाः, मुनयः, गोप्त्रे, नयचक्षुषे, अर्हते, सभार्याय, तस्मै, अर्हणां, चक्रुः,

**व्याख्याः**– सभ्याः = सभासदः, गुप्ततमेन्द्रियाः = (गुप्ततमानि इन्द्रियाणि येषां ते) अत्यन्तनियमितेन्द्रियाः, मुनयः = तपोवासिनः, गोप्त्रे = रक्षकाय, नयचक्षुषे = नीतिशास्त्रलोचनाय, अर्हते = पूज्याय, सभार्याय = पत्नीसहिताय, तस्मै = दिलीपाय, अर्हणाम् = सपर्याम्, चक्रुः = अकुर्वन् ।

**भावार्थः**– आश्रमे जितेन्द्रियाः सभ्याः तपस्विनः प्रजारक्षकस्य नीतिज्ञस्य सपत्नीकस्य दिलीपस्य स्वागतं चक्रुः ।

**विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम् ।**
**अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम् ॥५६॥**

**अन्वयः**– सः, सायन्तनस्य, विधेः, अन्ते, अरुन्धत्या, अन्वासितं, तपोनिधिम्, स्वाहया, (अन्वासितं) हविर्भुजम् इव, ददर्श ।

**व्याख्याः**– सः = दिलीपः, सायन्तनस्य = सन्ध्याकालीनस्य, विधेः = जपहोमाद्यनुष्ठानस्य, अन्ते = अवसाने, अरुन्धत्या = अरुन्धतीनाम्न्या स्वभार्यया, अन्वासितम् = उपासितम्, तपोनिधिम् = वसिष्ठम्, स्वाहया = स्वाहादेव्या स्वाहारूपपत्न्या, (अन्वासितम् उपासितम्) हविर्भुजम् = (हविः भुनक्ति इति हविर्भुक्, तम्) अग्निम् इव, ददर्श = दृष्टवान् ।

**भावार्थः**–दिलीपः सन्ध्याकालीनस्य अनुष्ठानस्य अन्ते स्वाहादेव्या उपासितम् अग्निमिव शोभायमानम् अरुन्धत्या सेवितं वसिष्ठं ददर्श ।

**तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी ।**
**तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥५७॥**

**अन्वयः**– मागधी, राज्ञी, राजा च, तयोः, पादान्, जगृहतुः, गुरुपत्नी गुरु च तौ प्रीत्या, प्रतिननन्दतुः ।

**व्याख्याः**– मागधी = मगधराजपुत्री, राज्ञी = राजपत्नी (सुदक्षिणा), राजा च = भूपतिः (दिलीपश्च) तयौः = अरुन्धती–वसिष्ठयो, पादान् = चरणान्, जगृहतुः = गृहीतवन्तौ (सपत्नीकौ राजा सपत्नीकं गुरुं नमस्कृतवान्), गुरुपत्नी = अरुन्धती, गुरुश्च = वसिष्ठोऽपि तौ = सुदक्षिणादिलीपौ, (कर्म) प्रीत्या = हर्षेण, प्रतिननन्दतुः = आशीर्वादादिभिः संभावयाञ्चक्रतुः ।

**भावार्थः**– तत् पश्चात् सुदक्षिणा दिलीपश्च अरुन्धतीवसिष्ठयोः पादान् जगृहतुः, तस्मिन् समये गुरुपत्नी गुरुश्च सुदक्षिणादिलीपौ हर्षेण अभिनन्दनं चक्रतुः ।

**तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् ।**
**पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥५८॥**

**अन्वयः**–मुनिः, आतिथ्य–क्रियाशान्तरथक्षोभपरिश्रमम्, राज्याश्रममुनिं, तम्, राज्ये, कुशलं, पप्रच्छ ।

**व्याख्या:**– मुनिः=तपस्वी वसिष्ठः, आतिथ्यक्रियाशान्तरथक्षोभपरिश्रमम्= (आतिथ्यस्य क्रिया तया शान्तो रथक्षोभेण यः परिश्रमः सः, यस्य सः तम्) अभ्यागतसत्कारकर्मनिवृत्त–स्यन्दन–सञ्चलनश्रमम्, राज्याश्रममुनिम्=(राज्यमेव आश्रमः राज्याश्रमः, राज्याश्रमे मुनिः राज्याश्रममुनिः तम्) राज्यरूपाश्रमऋषितुल्यम्, तम्=दिलीपम्, राज्ये =राष्ट्रविषये, कुशलम्=क्षेमम्, पप्रच्छ=पृष्टवान् ।

**भावार्थ:**– मुनिः वसिष्ठः विश्रामानन्तरं राज्यविषये दिलीपं कुशलं पप्रच्छ ।

**अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः ।**
**अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ॥५९॥**

**अन्वय:**– अथ, विजितारिपुरः, वदतां, वरः, अर्थपतिः, अथर्वनिधेः, तस्य, पुरः, अर्थ्यां, वाचम्, आददे ।

**व्याख्या:**– अथ=राज्यसम्बन्धिकुशलादिप्रश्नानन्तरम्, विजितारिपुरः=(विजितानि अरिपुराणि येन सः) विजितशत्रुनगरः, वदताम्=वक्तॄणाम्, वरः=श्रेष्ठः, अर्थपतिः= धनेश्वरः, (महाराजो दिलीपः) अथर्वनिधेः=(अथर्वस्य निधिः अथर्वनिधिः, तस्य) अथर्ववेदाकरस्य, तस्य=गुरोः वसिष्ठस्य, पुरः=अग्रे, अर्थ्याम्=अर्थयुक्ताम् वाचम्= वाणीम्, आददे=जगृहे (वक्तुम् आरब्धवान्) ।

**भावार्थ:**– राज्यविषये कुशलादिप्रश्नानन्तरं विजितशत्रुनगरः विवेकशीलःदिलीपः अथर्वनिधेः वसिष्ठस्य अग्रे अर्थयुक्तां वाणीं वक्तुम् आरब्धवान् ।

**उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।**
**दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदाम् ॥६०॥**

**अन्वय:**–(हे गुरो) सप्तसु, अङ्गेषु, मे, शिवम्, उपपन्नं, ननु, यस्य दैवीनां, मानुषीणां, च आपदां, त्वं प्रतिहर्ता (असि) ।

**व्याख्या:**– (हे गुरो) सप्तसु=सप्तसंख्यकेषु, अङ्गेषु=स्वाम्यामात्यदिराज्याङ्गेषु, स्वाम्यमात्य–सुहृत्–कोश–राष्ट्र–दुर्ग–बलानि इति सप्ताङ्गानि। मे=मम, शिवम्= कल्याणम्, उपपन्नम्=युक्तम्, ननु=अस्त्येव, यस्य=(मम) दिलीपस्य, दैवीनाम्= देवेभ्यः आगतानाम् दुर्भिक्षादीनाम्, मानुषीणाम्=मनुष्येभ्यः आगतानां चौरभयादीनाम्, च आपदाम्=आपत्तीनाम्, त्वम्=भवान्, प्रतिहर्ता=दूरीकर्ता (असि)।

भावार्थः– हे गुरो राज्यस्थ सप्तसंख्यकेषु अङ्गेषु कल्याणमस्ति। मम (दिलीपस्य) देवेभ्यः आगतानां दुर्भिक्षादीनां मनुष्येभ्यः आगतानां चौरभयादीनां च आपदां दूरीकर्ता भवान्, अतः एव राज्यस्य सम्पूर्णक्षेत्रे कुशलम्।

**तव मन्त्रकृतो मन्त्रैर्दूरात् प्रशमितारिभिः।**
**प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥६१॥**

**अन्वयः**– दूरात्, प्रशमितारिभिः, मन्त्रकृतः, तव, मन्त्रैः, दृष्टलक्ष्यभिदः, मे, शराः, प्रत्यादिश्यन्ते इव।

**व्याख्याः**– दूरात् = परोक्ष एव, प्रशमितारिभिः = (प्रकर्षेण शमिताः इति प्रशमिताः, प्रशमिता अरयः यैः ते प्रशमितारयः तैः) प्रशान्तशत्रुभिः, मन्त्रकृतः = मन्त्राणां स्रष्टुः, तव = भवतः, मन्त्रैः = वेदमन्त्रैः, दृष्टलक्ष्यभिदः = (दृष्टं च तत् लक्ष्यम् इति दृष्टलक्ष्यम्, दृष्टलक्ष्यं भिन्दन्ति इति दृष्टलक्ष्यभिदः) प्रत्यक्ष्यलक्षभेदनकर्तारः, मे = मम, शराः = बाणाः, प्रत्यादिश्यते = निराक्रियन्ते इव।

**भावार्थः**– परोक्षात् एव शत्रून् वशीकर्ता भवान् अस्ति, अतः भवतः मन्त्रैः मम प्रत्यलक्ष्यभेदनकर्तारः बाणाः निराक्रियन्ते इव। तव मन्त्रप्रभावेणैव शत्रवः नश्यन्तीति मम बाणप्रयोगो नावश्यक इत्यर्थः।

**सम्प्रति देविकापत्प्रतीकारमाह**

**हविरावर्जितं होतस्त्वया विधिवदग्निषु।**
**वृष्टिर्भवति सस्यानामवग्रहविशोषिणाम् ॥६२॥**

**अन्वयः**– होतः, त्वया, विधिवत्, अग्निषु, आवर्जितं, हविः, अवग्रहविशोषिणां, सस्यानां, वृष्टिः, भवति।

**व्याख्याः**– हे होतः = हे हवनकर्तः, त्वया = भवता, विधिवत् = यथाशास्त्रम्, अग्निषु = वन्हिषु, आवर्जितम् = प्रदत्तम्, हविः = घृतादिहवनीयम्, द्रव्यम्, अवग्रहविशोषिणाम् = (अवग्रहः तेन विशुष्यन्तीति अवग्रहविशोषिणी, तेषाम्) वृष्टिप्रतिबन्धः तेन विषुष्याम्, सस्यानाम् = धान्यानाम्, वृष्टिः = वर्षणम्, भवति = सम्पद्यते, वृष्टिरूपेण सस्यानि उपजीवयन्तीति भावः।

**भावार्थः**– हे गुरो भवता विधिपूर्वकं यज्ञे प्रयुक्तं हवनीयं द्रव्यं वृष्टिप्रतिबन्धेन विशुष्मतां धान्यानां वृष्टिरूपं भवति। इत्थं भवतः प्रतापेन मम राज्ये कदापि दुर्भिक्षं न भवति।

**पुरुषायुषजीविन्यो निरातङ्का निरीतयः ।**
**यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम् ॥६३॥**

**अन्वयः**– मदीयाः, प्रजाः, पुरुषायुषजीविन्यः, निरातङ्काः, निरातयः, यत्, तस्य, हेतुः, त्वब्रद्ह्मवर्चसम्, (एव) ।

**व्याख्या**:– (हे गुरूवर) मदीयाः=मत्सम्बन्धिन्यः, प्रजाः=जनाः, पुरुषायुषजीविन्यः= (पुरुषस्य आयुः पुरुषायुः, पुरुषायुषं जीवन्तीति तच्छीलाः पुरुषायुषजीविन्यः) शतायुर्वै पुरुषः, इति स्मरणात् शतवर्षजीविनशीलाः, निरातङ्काः=निःशङ्काः, निरीतयः=अतिवृष्ट्यादिरहिताः, यत्=फलम्, तस्य=सर्वस्य, हेतुः=कारणम्, त्वद्ब्रह्मवर्चसम्= (ब्रह्मणः वर्चः ब्रह्मवर्चसम्) भवद्व्रताध्ययनसम्पत्तिः, एव ।

**भावार्थ**:– हेगुरो मदीयाः प्रजाः शतवर्षजीविन्यः सन्ति । मम राज्ये प्रजाः अतिवृष्ट्यादिरहिताः इति निशङ्काः संलग्नाः वर्तन्ते । तत्कारणन्तु भवतः (वसिष्ठस्य) व्रताध्ययनादिकं तपोबलम् एव मन्यते ।

**त्वयैवं चिन्त्यमानस्य गुरूणा ब्रह्मयोनिना ।**
**सानुबन्धाः कथं न स्युः संपदो मे निरापदः ? ॥६४॥**

**अन्वयः**– ब्रह्मयोनिना, गुरूणा, त्वया, एवं, चिन्त्यमानस्य, (अतः एव) निरापदः मे, सम्पदः, सानुबन्धाः, कथं, न स्युः ।

**व्याख्या**:– (हे गुरूदेव) ब्रह्मयोनिना (ब्रह्मा योनिः यस्य सः ब्रह्मयोनिः, तेन) ब्रह्मपुत्रेण, गुरूणा=आचार्येण, त्वया=भवता, एवम्=पूर्वोक्तप्रकारेण, चिन्त्यमानस्य= (चिन्त्यते इति चिन्त्यमानः, तस्य) अनुध्यायमानस्य, (अत एव) निरापदः=व्यसनहीनस्य, मे=मम, सम्पदः=सम्पत्तयः, सानुबन्धाः=अनुबन्धेन सहिताः, अविच्छिन्ना इति यावत् । कथम्=केन प्रकारेण, न स्युः=न भवेयुः ? ।

**भावार्थ**:– ब्रह्मणः मानसपुत्र हे गुरूवर भवान् एव पूर्वोक्तरूपेण मम राज्यस्य निर्विघ्नतायै संलग्नः भवति । अत एव निरापदः मम (दिलीपस्य) राज्यसम्पत् सर्वदा सुस्थिरा वर्तते ।

**सम्प्रत्यागमनप्रयोजनमाह**

**किन्तु वध्वां तवैतस्यामदृष्टसदृशप्रजम् ।**
**न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥६५॥**

**अन्वयः**– किन्तु, तव, एतस्यां, वध्वाम्, अदृष्टसदृशप्रजं, सद्वीपा, अपि, रत्नसूः, (अपि) मेदिनी, न अवति ।

**व्याख्याः**– किन्तु तव=भवतः एतस्याम्=पुरोवर्तिन्याम्, वध्वाम्=स्नुषायाम् (सुदक्षिणायाम्) अदृष्टसदृशप्रजम्=(सदृशी चासौ प्रजा सदृशप्रजा, अदृष्टा सदृशप्रजा येन सः अदृष्टसदृशप्रजः– तम्) अनवलोकितानुरूपसन्ततिम्, माम्=दिलीपम्, सद्वीपा= भूखण्डविशेषैः सह वर्तमाना, अपि रत्नसूः=मणिप्रसवनी, मेदिनी=पृथिवी, न अवति= नप्रीणाति ।

**भावार्थः**– मम (दिलीपस्य) राज्यस्य सर्वस्मिन् क्षेत्रे वैभवे सत्यपि भवतः अग्रे स्थितायां वध्वाम् (सुदक्षिणायाम्) सन्तानाभावात् रत्नप्रसवनी पृथिवी अपि अपुत्रस्य मम कृते प्रीतिदायिनी नास्ति ।

**तदेव प्रतिपादयति**

**नूनं मत्तः परं वश्याः पिण्डविच्छेददर्शिनः ।**
**न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥६६॥**

**अन्वयः**– मत्तः परं, पिण्डविच्छेददर्शिनः, वंश्याः स्वधासंग्रहतत्पराः (सन्तः), श्राद्धे प्रकामभुजः, नूनं, (भविष्यन्ति) ।

**व्याख्याः**– मत्तः परम्=मदनन्तरम् पिण्डविच्छेददर्शिनः= (पिण्डस्य विच्छेदः, पिण्डविच्छेदः पिण्डविच्छेदं पश्यन्तीति पिण्डविच्छेददर्शिनः) पिण्डदानविच्छेदमुत्प्रेक्षमाणाः वंश्या=पितरः, स्वधासंग्रहतत्पराः= (स्वधासंग्रहे तत्पराः स्वधासंग्रहतत्पराः) पितृभो- ज्यसंग्रहणाऽसक्ताः, श्राद्धे=पितृकर्मणि, प्रकामभुजः=पर्याप्तभोजिनः, नूनम्=निश्चितम् न (भविष्यन्ति) ।

**भावार्थः**– अस्मिन् कुले सन्तानाभावकारणेन मत्पश्चात् श्राद्धतर्पणादिकं न भविष्यति, इति विचार्य पितरः श्राद्धे पर्याप्तभोजिनः न भवन्ति ।

**मत्परं दुर्लभं मत्वा नूनमावर्जितं मया ।**
**पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते ॥६७॥**

**अन्वयः**– मत्परं, दुर्लभं, (पितृ–तर्पणजलं) मत्वा, मया, आवर्जितं, पयः, पूर्वैः, स्वनिःश्वासैः, कवोष्णं, नूनम्, उपभुज्यते ।

**व्याख्याः**– मत्परम्=मदनन्तरम्, दुर्लभम्=दुर्लभ्यम् (पितृ-तर्पणजलं) मत्वा= अवगम्य, मया=दिलीपेन, आवर्जितम्=दत्तम् पयः=पितृतर्पणजलम्, पूर्वैः=पूर्वजैः,

(पितृभिः) स्वनिःश्वासैः =सदुःखजैः, कवोष्णम् =मन्दोष्णम्, नूनम् =निश्चित उपभुज्यते =पीयते ।

**भावार्थः**– मदनन्तरं पितृ–तर्पणजलं दुर्लभं मत्वा अधुना एव मया दिलीपेन श्राद्धे दत्तं जलं पूर्वजैः स्वदुःखजैः ईषदुष्णं पीयते ।

**सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ।**
**प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥६८॥**

**अन्वयः**– इज्याविशुद्धात्मा, प्रजालोपनिमीलितः, सः, अहं, लोकालोकः, अचलः, इव प्रकाशश्च, अप्रकाशश्च (अस्मि) ।

**व्याख्याः**– इज्याविशुद्धात्मा =(विशुद्धः आत्मा यस्य सः विशुद्धात्मा, इज्यया विशुद्धात्मा इज्याविशुद्धात्मा) यागविशुद्धचेतनः, प्रजालोपनिमीलितः = (प्रजायाः लोपः प्रजालोपः, प्रजालोपेन निमीलितः प्रजालोपनिमीलितः) सन्तत्यभावकृतनिमीलनः, सः =एतादृशः, अहम् =दिलीपः, लोकालोकः =चक्रवालनामकः, अचल =पर्वतः, इव प्रकाशश्च =द्योतकश्च, अप्रकाशश्च =अव्यक्तरूपश्च (पितृ–ऋणविमोचनाभावात् इति भावः) (अस्मि) ।

**भावार्थः**– दिलीपः सन्ततिविषये वसिष्ठं प्रति एतादृशरूपेण कथयति । यज्ञदानादिकरणेन विशुद्धात्माः सन्तानस्य अभावेन निमीलितलोचनः सन् अहम्, चक्रवालनामकः पर्वतः इव, प्रकाशः अप्रकाशश्च अस्मि । यथा लोकालोकः नामकः पर्वतोऽपि अन्तः सूर्यसम्पर्कात् सप्रकाशः, बहिः तमोव्याप्त्या अप्रकाशश्च भवति तथैव अहं दिलीपोऽपि यज्ञादिभिः देवऋणविमोचनात् प्रकाशः, सन्तत्यभावेन पितृऋणविमोचनाभावात् अप्रकाशश्चास्मि ।

**ननु तपोदानादिसंपन्नस्य किमपत्यैरित्यत आह**

**लोकान्तसुखं पुण्यं तपोदानसमुद्भवम् ।**
**सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे ॥६९॥**

**अन्वयः**– तपोदानसमुद्भवम्, पुण्यं, लोकान्तरसुखम्, (अस्ति), शुद्धवंश्या, सन्ततिः हि, इह, परत्र, च शर्मणे (भवति) ।

**व्याख्याः**– तपोदानसमुद्भवम् =(तपश्चदानं च तपोदाने, समुद्भवति अस्मात् इति समुद्भवः, तपोदाने समुद्भवः यस्य तत् तपोदानसमुद्भवम्) तपस्या–दानोत्पन्नम्, पुण्यम् =सुकृतम्, लोकान्तरसुखम् =परलोकसुखकरम्, शुद्धवंश्या =पवित्रवंशोद्भवा,

सन्तति =प्रजा, हि= तु, इह =अस्मिन् लोके, परत्र =परस्मिन् लोके च, शर्मणे =सुखाय कल्याणाय (भवति) ।

**भावार्थः**– तपस्यादानकरणेन यत् पुण्यं भवति तेन मरणानन्तरम् (परलोके) एव सुखं भवति ।

परन्तु शुद्धकुलोत्पन्नः पुत्रः इहलोके परलोके च कल्याणकारको भवति।

**तया हीनं विधातर्मां कथं पश्यन्न दूयसे ? ।**
**सिक्तं स्वयमिव स्नेहाद् बन्ध्यमाश्रमवृक्षकम् ।।७०।।**

**अन्वयः**– हे विधातः, तया, हिनं, मां, स्नेहात्, स्वयम्, एव, सिक्तं, वन्ध्यम्, आश्रम-वृक्षकम्, इव पश्यन्, कथं, न दूयसे ?

**व्याख्या**:– हे विधातः =स्रष्टः, तया =सन्तत्या, =हीनम्, =रहितम् (अनपत्यम्), मां =दिलीपम्, स्नेहात् =प्रेम्णा, स्वयमेव =आत्मना एव, सिक्तम् =जलसेकेन वर्धितम्, वन्ध्यम् =अफलम्, आश्रमवृक्षकम् = (आश्रमस्य वृक्षकम्, आश्रमवृक्षकम्) तपोवनवृ-क्षपोतम् इव पश्यन् =अवलोकयन्, कथम् न दूयसे ? =न परितप्यसे ?

**भावार्थः**– हे त्रिकालज्ञ महर्षे वसिष्ठ बन्ध्यं वृक्षमिव मां (दिलीपं) सन्तत्या हीनं च दृष्ट्वा भवतः मनसि खेदो नभवति ? प्रेम्णा स्वयमेव, जलादिसेचनेन वर्धितम् आश्रमवृक्षं फलरहितं दृष्ट्वा यथा परितप्यसे तथैव मां सन्तत्या रहितं दृष्ट्वा परितपनमावश्यकम् ।

**असह्यपीडं भगवन्नृणमन्त्यमवेहि मे ।**
**अरून्तुदमिवालानमनिर्वाणस्य दन्तिनः ।।७१।।**

**अन्वयः**– भगवन्, मे, अन्त्यम्, ऋणम्, अनिर्वाणस्य, दन्तिनः, अरून्तुदम्, आलानम् इव, असह्यपीडम्, अवेहि ।

**व्याख्या**:– हे भगवन् मे =मम दिलीपस्य, अन्त्यम् =पैतृकम् ऋणम्, अनिर्वाणस्य =मज्जनरहितस्य, दन्तिनः =गजस्य, अरून्तुदम् =मर्मस्पृक आलानम् इव =बन्धनस्त-म्भम् इव, असह्यपीडम् = (सोढुं योग्या सह्या न सह्या, असह्या पीडा यस्मिन् तत् असह्यपी-डम्) दुःसहदुःखजनकम्, अवेहि= जानीहि ।

**भावार्थः**– हे भगवन्, मम (दिलीपस्य) अन्त्यं पैतृकम् ऋणं स्नानरहितस्य हस्तिनः मर्मभेदिनं वन्धनस्तम्भम् इव असह्यपीडं जानीहि ।

**तस्मान्मुच्ये यथा तात ? सविधातुं तथार्हसि।**
**इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिध्दयः ॥७२॥**

**अन्वयः**– हे तात, तस्मात्, यथा, मुच्ये तथा, संविधातुं, त्वम्, अर्हसि। हि, इक्ष्वाकूणा, दुरापे अर्थे, सिद्धयः त्वदधीनाः।

**व्याख्या**:– हे तात=हे पितः, तस्मात्=पैतृकात् ऋणात् यथा=येन प्रकारेण, मुच्ये =मुक्तो भवामि, तथा =तेन प्रकारेण, संविधातुम्=कर्तुम्, त्वम् अर्हसि=योग्योऽसि। हि=यस्मात् कारणात्, इक्ष्वाकूणाम्=इक्ष्वाकुवंश्यानां राज्ञाम्, दुरापे=दुष्प्राप्ये, अर्थे =प्रयोजने, सिद्धयः=कार्यसिद्धयः, त्वदधीनाः=त्वदायत्ताः (सन्ति)।

**भावार्थः**– हे तात पैतृकऋणात् यथा मुच्ये, तथैव कर्तुं त्वम् एव योग्योऽसि। यतः इक्ष्वाकुवंश्यानां राज्ञां दुष्प्राप्यप्रयोजने कार्यसिद्धयः त्वदधीनाः सन्ति।

**इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः।**
**क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ॥७३॥**

**अन्वयः**– इति, राज्ञा, विज्ञापितः, ऋषिः, ध्यानस्तिमितलोचनः, (सन्) क्षणमात्रं, सुप्तमीनः, ह्रदः, इव तस्थौ।

**व्याख्या**:– इति=इत्थं प्रकारेण, राज्ञा=दिलीपेन विज्ञापितः=निवेदितः, ऋषिः =वसिष्ठः, ध्यानस्तिमितलोचनः= (ध्यानेन स्तिमिते लोचने यस्य सः ध्यानस्तिमित-लोचनः) चिन्तननिश्चलः=नयनः, (सन्) क्षणमात्रम्=किञ्चित्कालम्, सुप्तमीनः= निद्रितमत्स्यः, ह्रदः=अगाधजलस्तडाग इव तस्थौ=स्थितः।

**भावार्थः**– पूर्वोक्तप्रकारेण राज्ञा दिलीपेन नम्रीभूय निवेदितः सन् महर्षिः वसिष्ठः, दिलीपस्य सन्ततिविषये क्षणमात्रं ध्यानमग्नः सन् सुप्तमत्स्यः ह्रद इव निश्चलोभूत्वा स्थितः।

**सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम्।**
**भावितात्मा भुवो भर्तुःरथैनं प्रत्यबोधयत् ॥७४॥**

**अन्वयः**– प्रणिधानेन, भावितात्मा, भुवः, भर्तुःसन्ततेः, स्तम्भकारणम्, अपश्यत्, अथ, एनं प्रत्यबोधयत्।

**व्याख्या**:– प्रणिधानेन=चित्तैकाग्रयेण, भावितात्मा=(भावितः आत्मा यस्य सः, भावितात्मा) शुद्धान्तः करणः, भुवः=पृथिव्याः, भर्तुः=स्वामिनः (दिलीपस्य) सन्ततेः

=सन्तानस्य स्तम्भकारणम्= (स्तम्भस्य कारणं तत्) सन्ततिप्रतिबन्धनिदानम्, अपश्यत्=अवलोकितवान् । अथ=सन्तानावरुद्धकारणावलोकानन्तरम्, एनम्=अमुम्, प्रत्यबोधयत्=प्रतिज्ञापितवान् ।

**भावार्थः**– समाधिस्थःवसिष्ठो दिलीपस्य सन्ततेः उत्पत्तिप्रतिबन्धकारणम् अपश्यत् । तत्पश्चात् सन्तानस्य प्रतिबन्धकारणं दिलीपं प्रत्यबोधयत् ।

**पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः ।**
**आसीत् कल्पतरूच्छायामाश्रिता सुरभिः पथि ॥७५॥**

**अन्वयः**– पुरा, शक्रम्, उपस्थाय, उर्वीं, प्रति, यास्यतः, तव, पथि, कल्पतरूच्छायाम्, आश्रिता, सुरभिः, आसीत् ।

**व्याख्याः**– पुरा=पूर्वम् (एकदा) शक्रम्=इन्द्रम्, उपस्थाय=संसेव्य, उर्वीं प्रति =भुवमुद्दिश्य, यास्यतः=गमिष्यतः, तव=भवतः (दिलीपस्य) पथि=वर्त्मनि, कल्पतरूच्छायाम्=(कल्पतरोः छाया इति कल्पतरूच्छाया ताम्) कल्पवृक्षस्य अधोभागम्, आश्रिता= संसेविता, सुरभिः=कामधेनुः, आसीत्=अभवत् ।

**भावार्थः**– एकदा त्वम् इन्द्रं संसेव्य पृथिवीं प्रति आगच्छन् आसीः । तव मा कल्पतरूच्छायाम् आश्रिता कामधेनुः आसीत् ।

**धर्मलोपभयाद् राज्ञीमृतुस्नातामिमां स्मरन् ।**
**प्रदक्षिणाक्रियार्हायां तस्यां त्वं साधु नाचरः ॥७६॥**

**अन्वयः**– ऋतुस्नाताम्, इमां राज्ञीं, धर्मलोपभयाद्, स्मरन्, प्रदक्षिणाक्रियार्हायां, तस्यां, त्वं, साधु, न आचरः ।

**व्याख्याः**– ऋतुस्नाताम्=(ऋतुना स्नाता इति ऋतुस्नाता ताम्) रजोदर्शनप्रयुक्तकृत स्नानाम्, इमाम्=पुरोवर्तिनीम्, राज्ञीम्=राजपत्नीं सुदक्षिणाम्, धर्मलोपभयात्=(धर्मस्य लोपः धर्मलोपः, धर्मलोपात् भयम् धर्मलोपभयम् तस्मात्) सुकृतभ्रंशभीतः,स्मरन्=ध्यायन्, प्रदक्षिणक्रियार्हायाम्=(प्रदक्षिणस्य क्रिया इति प्रदक्षिणाक्रिया, अर्हति इति अर्हा, प्रदक्षिणक्रियायाः अर्हा इति प्रदक्षिणक्रियार्हा तस्याम्) प्रदक्षिणकरणयोग्यायाम्, तस्याम्=धेन्वाम्, त्वम्=दिलीपः, साधुः=प्रदक्षिणादिसत्कारम्, न आचरः= न आचरितवान् ।

**भावार्थः**– गेहे ऋतुमती महिषी सुदक्षिणा वर्तत इति धर्मलोपस्य कारणं स्मरन् प्रदक्षिणादिसत्कारयोग्यायां तस्यां धेन्वां त्वं सत्कारं न कृतवान् ।

अनादृतायाः सुरभेर्दिलीपाय शापप्रदानमित्याह

**अवजानासि मां यस्मादतस्ते न भविष्यति ।**
**मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥७७॥**

**अन्वयः**– (हे राजन्) यस्मात्, (त्वम्) माम्, अवजानासि, अतः, मत्प्रसूतिम्, अनाराध्य, ते, प्रजा, न भविष्यति, इति, सा, त्वां, शशाप ।

**व्याख्याः**– (हेराजन्) यस्मात् = यतः कारणात् (त्वम्) माम् = सुरभिम् अवजानासि = तिरस्करोसि, अतः = अस्मात् कारणात, मत्प्रसूतिम् = मत्सन्ततिम्, अनाराध्य = (न आराध्य, अनाराध्य) असेवयित्वा, ते = तव (दिलीपस्य) प्रजा = सन्ततिः, न = नहि भविष्यति = उत्पत्स्यते, इति = इत्थम्, सा = कामधेनुः, त्वाम् = दिलीपम्, शशाप = शापं ददौ ।

**भावार्थः**– हे राजन् दिलीप "यस्मात् कारणात् त्वं मां कामधेनुं तिरस्करोसि, अस्मात्, कारणात् मत्सन्ततिम् अनाराध्य तव सन्ततिः न भविष्यति" इति कामधेनुः तुभ्यं शापं ददौ ।

कथं तदस्माभिर्न श्रुतमित्याह

**स शापो न त्वया राजन् नच सारथिना श्रुतः ।**
**नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ॥७८॥**

**अन्वयः**– हे राजन्, आकाशगङ्गायाः, स्रोतसि, उद्दामदिग्गज, नदति, (सति) सः, शापः, त्वया, न श्रुतः, सारथिना च, न (श्रुतः) ।

**व्याख्याः**– हे राजन् आकाशगङ्गायाः = (आकाशस्य गङ्गा आकाशगङ्गा, तस्याः आकाशगङ्गायाः) मन्दाकिन्याः, स्रोतसि = प्रवाहे, उद्दामदिग्गजे = (दाम्नः, उद्गता उद्दामानः, दिशां गजाः दिग्गजाः, उद्दामानः दिग्गजाः यस्मिन् तत् उद्दामदिग्गजं, तस्मिन् उद्दामदिग्गजे) बन्धनमुक्तदिग्गजे, नदति = (सति) अव्यक्तशब्दं कुर्वति सति, सः = पूर्वोक्तः, शापः = आक्रोशः । "न भविष्यति ते प्रजा" इति त्वया = भवता, न = नहि, श्रुतः = शुश्रुवे, सारथिना = सूतेन च न = नहि श्रुतः ।

**भावार्थः**– हे राजन् त्वया तव सारथिना च स शापः न श्रुतः, यतः, आकाशगङ्गायाः प्रवाहे बन्धनमुक्तऐरावतः अव्यक्तशब्दं कुर्वन्नासीत् । शद्वान्तरेण कामधेनूच्चारितः शापध्वनिर्न श्रुत इत्यर्थः ।

अस्तु प्रस्तुते किमायातमित्यत्राह

**ईप्सितं तदवज्ञानाद् विध्दि सार्गलमात्मनः ।**
**प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥७६॥**

**अन्वयः**– (हे राजन्) तदवज्ञानात्, आत्मनः, ईप्सितम्, सार्गलं, विद्धि । हि, पूज्यपूजाव्यतिक्रमः, श्रेयः, प्रतिबध्नाति ।

**व्याख्या**:– हे राजन् तदवज्ञानात्= (तस्याः अवज्ञानम् तदवज्ञानम्, तस्मात् तदवज्ञानात्) तस्याः धेनोः अपमानात्, आत्मनः=स्वस्य, ईप्सितम्=मनोरथम्, (पुत्रप्राप्तिरूपम्) सार्गलम्= (अर्गलया सह वर्तमानं तत् सार्गलम्) सप्रतिबन्धम्, विद्धि =जानीहि, हि=यतः, पूज्यपूजाव्यतिक्रमः= (पूजितुं योग्याः पूज्याः, पूज्यानां पूजा पूज्यपूजा, पूज्यपूज्यायाः व्यतिक्रमः पूज्यपूजाव्यतिक्रमः) अर्चनीयाऽर्चातिक्रमणम्, श्रेयः= कल्याणम्, प्रतिबध्नाति=विरूणध्दि । यस्मात् पूजनीयस्य पूजा प्रदक्षिणोल्लङ्घनं श्रेयः प्रतिबध्नाति ।

**भावार्थः**– हेराजन् ! धेनोःअपमान कारणात् पुत्रप्राप्ति रूपं मनोरथं प्रतिबन्धितं जानीहि। यस्मात् पूजनीयस्य पूजा प्रदक्षिणोल्लंघनं श्रेयः प्रतिबध्नाति ।

**हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः ।**
**भुजङ्गपिहितद्वारं पातालमधितिष्ठति ॥८०॥**

**अन्वयः**– सा, च, इदानीं, दीर्घसत्रस्य, प्रचेतसः, हविषे, भुजङ्गपिहितद्वारं, पातालम्, अधितिष्ठति ।

**व्याख्या**:–सा=कामधेनुः,च=अपि, इदानीम्=अधुना, दीर्घसत्रस्य= (दीर्घं सत्रं यस्य सः दीर्घसत्रः तस्य दीर्घसत्रस्य) चिरकालयागकर्तुः, प्रचेतसः=वरूणस्य हविषे= दध्याज्यादिहविरर्थम्, भुजङ्गपिहितद्वारम्= (भुजंगैः पिहितं द्वारं यत्रतद् भुजंगपिहित-द्वारम्) सर्पावरूद्धप्रतीहारम्, पातालम्=अधोलोकम्, अधितिष्ठति=अध्यास्ते ।

**भावार्थः**– हे राजन् अधुना सा कामधेनुः वरूणस्य यज्ञकार्यसम्पादनार्थं पाताले तिष्ठति ।

तर्हि का गतिरित्याह

**सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः ।**
**आराधय सपत्नीकः प्रीता कामदुघा हि सा ॥८१॥**

**अन्वयः**– सुरभेः, प्रतिनिधिं, कृत्वा, शुचिः, (सन्) सपत्नीकः, (त्वम् तां संपूज्य) तदीयां, सुताम्, आराधय, हि, सा, प्रीता, (सती) कामदुघा (भविष्यति) ।

**व्याख्या:–** (हेराजन् इदानीं पाताललोकस्थायाः सुरभेः अभावेऽपि तस्याः) सुरभेः= कामधेनोः, प्रतिनिधिम्, कृत्वा=निर्माय, शुचिः=शुद्धः (सन्), सपत्नीकः=भार्यासहितः, (त्वं तां प्रतिमां संपूज्य), तदीयाम्=सुरभिसम्बन्धिनीम्, सुताम्=पुत्रीम्. आराधय= सम्यक् सेवस्व। हि=यतः, सा=नन्दिनी, प्रीता=तुष्टा (सती) कामदुघा=अभीष्टपूरयित्री (भविष्यति)।

**भावार्थ:–** हे राजन् इदानीं पाताललोकस्थायाः सुरभेः अभावेऽपि तदीयां सुतां प्रतिनिधिं विधाय पवित्रो भूत्वा भार्यासहितः त्वं कामधेनुप्रतिमां संपूज्य तत्पश्चात् तस्याः पुत्रीम् आराधय। सा नन्दिनी प्रीता सती कामदुघा भविष्यति।

**इति वादिन एवास्य होतुराहुतिसाधनम्।**
**अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ॥८२॥**

**अन्वय:–** इति, वादिनः, एव, होतुः, अस्य, आहुतिसाधनं, नन्दिनी, नाम, अनिन्द्या, धेनुः, वनात्, आववृते।

**व्याख्या:–** इति=इत्थम्, वादिनः=वदतः, एव, होतुः=हवनशीलस्य, अस्य= मुनेः, (वसिष्ठस्य), आहुतिसाधनम्=(आहुतीनां साधनम् इति आहुतिसाधनम्) हवनसामग्रीकारणम्, नन्दिनी=तन्नाम्नी, (कामधेनुपुत्री) नाम अनिन्द्या=अगर्ह्या, धेनुः= नवप्रसवा गौः, वनात्=काननात्, आववृते=प्रत्यागता।

**भावार्थ:–** एवं प्रकारेण वदतः एव वसिष्ठस्य हवनसामग्रीकारणभूता नन्दिनी नाम प्रशस्ता नवप्रसवा गौः वनात् प्रत्यागता।

**सम्प्रतिधेनुं विशिनष्टि**

**ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला।**
**बिभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम् ॥८३॥**

**अन्वय:–** पल्लवस्निग्धपाटला ललाटोदयम्, आभुग्नं, श्वेतरोमाङ्कं, बिभ्रती, नवं, शशिनं, (बिभ्रती) सन्ध्या इव (वनात् आववृते)।

**व्याख्या:–** पल्लवस्निग्धपाटला=(स्निग्धा चाऽसौ पाटला स्निग्धपाटला, पल्लववत् स्निग्धपाटला इति पल्लवस्निग्धपाटला) किसलयचिक्कणश्वेतरक्तवर्णा, सा ललाटोदयम्= (ललाटे उदयो यस्य सः, तम्) भालस्थलोन्नतिकम्, आभुग्नम्=ईषद्वक्रम्, श्वेतरोमाङ्कम्= (श्वेतानि च तानि रोमाणि श्वेतरोमाणि तानि एव अङ्कः, तं श्वेतरोमाङ्कम्)

शुक्ललोमचिह्नम्, बिभ्रती=धारयन्ती, नवम्=नूतनम्, शशिनम्=चन्द्रम्, (बिभ्रती) सन्ध्या इव=सायङ्काल इव (वनात् प्रत्यागता) ।

**भावार्थः**– नूतनपल्लवसमानश्वेतरक्तवर्णा ललाटोद्भूतम् ईषद्वक्रं शुक्ललोमचिह्नं धारयन्ति सा नन्दिनी द्वितीयाचन्द्रं धारयन्ती सन्ध्या इव वनात् प्रत्यागता ।

**भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि ।**
**प्रस्रवेनाभिवर्षन्ती वत्सालोकप्रवर्तिना ॥८४॥**

**अन्वयः**– कोष्णेन, अवभृथादपि, मेध्येन, वत्सालोकप्रवर्तिना, प्रस्रवेन, भुवम्, अभिवर्षन्ती, कुण्डोध्नी (नन्दिनी वनात् आववृते) ।

**व्याख्याः**–कोष्णेन=किञ्चिदुष्णेन, अवभृथादपि=यज्ञाङ्गभूतस्नानादपि, मेध्येन=पवित्रेण, वत्सालोकप्रवर्तिना=(वत्सस्य आलोकः वत्सालोकः तेन प्रवर्तिना, वत्सालोकप्रवर्तिना), शकृत्करि=पुत्रदर्शनप्रवहता, प्रस्रवेन=क्षीराभिष्यन्दनेन, भुवम्=पृथिवीम् अभीवर्षन्ती=सिञ्चन्ती, कुण्डोध्नी=पिठरसदृशपीनवती, (नन्दिनी वनात् आजगाम) ।

**भावार्थः**– ईषदुष्णेन यज्ञान्ताभिषेकोदकात् अधिकपवित्रेण वत्सदर्शनेन प्रवहता दुग्धाभिष्यन्दनेन पृथिवीं सिञ्चन्ती कुण्डोध्नी नन्दिनी वनात् आजगाम ।

**रजः कणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात् ।**
**तीर्थाभिषेकजां शुद्धिमादधाना महीक्षितः ॥८५॥**

**अन्वयाः**– खुरोद्धतेः, अन्तिकात् गात्रं, स्पृशद्धः, रजः, कणैः, महीक्षितः, तीर्थाभिषेकजां, शुद्धिम्, आदधाना (नन्दिनी वनात् आजगाम)

**व्याख्याः**– खुरोद्धूतैः=(खुरेभ्यः उद्धूताः खुरोद्धुताः तैः) शफोत्थितैः,अन्तिकात्=समीपात्, गात्रम्=शरीरम्, स्पृशद्भिः=स्पर्शं कुर्वद्भिः, रजः कणैः=धूलिलवैः, महीक्षितः=(महीं क्षीयते इति महीक्षित् तस्य महीक्षितः) भूपालस्य दिलीपस्य, तीर्थाभिषेकजाम्=(तीर्थानाम् अभिषेकः तीर्थाभिषेकः, तीर्थाभिषेकेण जाता तीर्थाभिषकजा, ताम्) तीर्थजलाभिषेकोत्पन्नाम्, शुद्धिम्=पवित्रताम्, आदधाना=कुर्वाणा, (नन्दिनी वनात् आजगाम) ।

**भावार्थः**– खुरोत्थितैः समीपात् शरीरस्पर्शं कुर्वद्भिः धूलिकणैः दिलीपस्य तीर्थजलाभिषेकोत्पन्नां शुद्धिं कुर्वाणा नन्दिनी वनात् आश्रमं प्रत्यागता ।

**तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।**
**याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥८६॥**

**अन्वयः**– निमित्तज्ञः, तपोनिधिः, पुण्यदर्शनां, तां, दृष्ट्वा, आशंसितावन्ध्यप्रार्थनं, पुनरब्रवीत् ।

**व्याख्या:**– निमित्तज्ञः = (निमित्तं जानातीति निमित्तज्ञः) शकुनज्ञः, तपोनिधिः = (तपसां निधिः, तपोनिधिः) वसिष्ठः, पुण्यदर्शनाम् = (पुण्यं दर्शनं यस्याः सा पुण्यदर्शना, ताम्) पुण्यावलोकनाम्, ताम् = नन्दिनीम्, दृष्ट्वा = अवलोक्य, आशंसिताऽवन्ध्यप्रार्थनम् = (न वन्ध्या अवन्ध्या अवन्ध्या प्रार्थना यस्य सः अवन्ध्यप्रार्थनः, आशंसिते अवन्ध्यप्रार्थनः इति आशंसिताऽवन्ध्यप्रार्थनः, तम्) मनोरथसफलनिवेदनम्, याज्यम् = (याजयितुं योग्यः याज्यः, तं याज्यम् (याजितुं योग्यं राजानम्, पुनः = भूयः, अब्रवीत् = उवाच ।

**भावार्थः**– शुभाशुभलक्षणज्ञः वसिष्ठः शुभदर्शनां तां नन्दिनीं दृष्ट्वा राजनं सफलमनोरथं मत्वा पुनः दिलीपम् अकथयत् ।

**अदूरवर्तिनीं सिद्धिं राजन् ? विगणयात्मनः ।**
**उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ॥८७॥**

**अन्वयः**– हे राजन् ? आत्मनः, सिद्धिम्, अदूरवर्तिनी, विगणय, यत् कल्याणी, इयं, नाम्नि, कीर्तिते, एव उपस्थिता ।

**व्याख्या:**– हे राजन् ? आत्मनः = स्वस्य (कार्यस्य) सिद्धिम् = सफलताम्, अदूरवर्तिनीम् = (न दूरम् अदूरम् अदूरे वर्तते इति अदूरवर्त्तिनी, ताम् अदूरवर्तिनीम्) शीघ्रभाविनीम्, विगणय = विद्धि, यत् = यस्मात् कारणात्, कल्याणी = मङ्गलमूर्तिः, इयम् = धेनुः, नाम्नि = स्वकीये नन्दिनीत्यभिधाने, कीर्तिते = कथिते एव उपस्थिता = प्राप्ता ।

**भावार्थः**– हे राजन् त्वं स्वस्य कार्यस्य सिद्धिं समीपवर्तिनीं जानीहि । यत मङ्गलमूर्तिः धेनुः नाम्नि कथिते सत्येव उपस्थिता ।

**वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम् ।**
**विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ॥८८॥**

**अन्वयः**– वन्यवृत्तिः, (सन्) इमां, गां, शश्वत्, आत्मानुगमनेन, अभ्यसनेन, विद्याम् इव, प्रसादयितुम्, अर्हसि ।

**व्याख्या:**– वन्यवृत्तिः = (वने भवा वन्या वन्या वृत्तिः,यस्य सः वन्यवृत्तिः) कन्दमूलाद्याहारः (सन्)इमाम् = पुरोवर्तिनीम् गाम् = धेनुम् शश्वत् = सदाआत्मानुगमनेन = (आत्मनः अनुगमनम् आत्मानुगमनम् तेन आत्मानुगमनेन) स्वानुसरणेन, अभ्यसनेन = अनुष्ठातुः अभ्यासेन, विद्याम् = शास्त्रम् इव, प्रसादयितुम् = प्रसन्नां कर्तुम्, अर्हसि = योग्योऽसि ।

**भावार्थः**– हे राजन् त्वं वनोत्पन्नं कन्दमूलादिकं भक्षयित्वा सदा नन्दिन्याः अनुसरणेन अभ्यासेन विद्याम् इव नन्दिनीं प्रसन्नां कर्तुं शक्नोसि ।

**गवानुसरणप्रकारमाह**

**प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः ।**
**निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ॥८९॥**

**अन्वयः**– अस्यां, प्रस्थितायां (त्वम्) प्रतिष्ठेथाः, स्थितायां, स्थितिम्, आचरेः, निषण्णायां, निषीद, पीताम्भसि, अपः, पिबेः ।

**व्याख्याः**– (हे राजन् ?) अस्याम् = एतस्याम्, पुरोवर्तिन्यां नन्दिन्याम्, प्रस्थितायाम् = प्रयातायाम्, त्वं प्रतिष्ठेथाः = प्रयाहि । स्थितायाम् = निवृत्तगतिकायाम्, स्थितिम् = गतिनिरोधम् आचरेः = कुरु । (तिष्ठ) निषण्णायाम् = उपविष्टायाम्, निषीद = उपविश । पीताम्भसि = (पितम् अम्भः यया सा पीताम्भाः तस्यां पीताम्भसि) कृतजलपानायाम्, अपः = जलम्, पिबेः = पिब ।

**भावार्थः**– वसिष्ठः अकथयत्–हे राजन् त्वं छायायाः अनुरूपेण नन्दिन्याः अनुसरणं कुरु । तव मनोरथः सफलःभवति । यदा नन्दिनी चलति तदा त्वमपि चल, यदा नन्दिनी तिष्ठति तदा त्वमपि तिष्ठ, यदा नन्दिनी वसति तदा त्वमपि वस, यदा नन्दिनी जलं पिबति तदा त्वमपि जलं पिब, एवं प्रकारेण नन्दिन्याः अनुसरणं कुरु ।

**वधूर्भक्तिमती चैनामर्चितामातपोवनात् ।**
**प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ॥९०॥**

**अन्वयः**– वधूः, भक्तिमती, (सती) अर्चिताम्, एनां, प्रातः, आ तपोवनात्, अन्वेतु, सायम्, अपि प्रत्युद्व्रजेत् ।

**व्याख्याः**–(हे राजन् ?) वधूः = स्नुषा (सुदक्षिणा), भक्तिमती = भक्तिपूर्णा, (सती) अर्चिताम् = गन्धादिभिः पूजिताम्, एनाम् = नन्दिनीं गाम् । प्रातः = प्रभाते, आ तपोवनात् = तपोवनपर्यन्तम्, अन्वेतु = अनुगच्छतु, सायम् = सन्ध्याकाले, अपि, प्रत्यु-

द्व्रजेत्=(तत्स्वागतार्थं) प्रत्युद्गच्छेत् (प्रातः तपोवनसीमापर्यन्तं सायं (नन्दिन्याः प्रत्यागमनकाले) तपोवनसीमाप्रदेशं च गत्वा तां स्वागतं करोत्विति भावः) ।

**भावार्थः–** हे राजन् सुदक्षिणा प्रातः काले भक्तिपूर्णा सती पूजितां नन्दिनीं तपोवनसीमापर्यन्तं स्वागतार्थम् अनुगच्छतु, वनात् नन्दिन्याः प्रत्यागमनकाले तपोवन-सीमाप्रदेशं च गत्वा तां स्वागतं करोतु ।

**नन्दिनीपरिचर्याऽवधिं निर्दिशन्नाह**

**इत्या प्रसादादस्यास्त्वं परिचर्यापरो भव ।**
**अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् ॥६१॥**

**अन्वयः–** इति, त्वम्, आ प्रसादात्, अस्याः, परिचर्यापरो भव, ते अविघ्नम्, अस्तु, पिता, इव, पुत्रिणां, धुरि, स्थेयाः ।

**व्याख्या:–** (हे राजन्, ?) इति=पूर्वोक्तप्रकारेण, त्वम्=दिलीपः, आप्रसादात्=(प्रसादम् अभिव्याप्य इति आ प्रसादम् तस्मात्) प्रसादपर्यन्तम्, अस्याः=नन्दिन्याः, परिचर्यापरो भव=शुश्रुषापरो भव, ते=तव अविघ्नम्=विघ्नाभावः, अस्तु=भवतु, पिता इव=जनक इव, पुत्रिणाम्=सत्पुत्रवताम्, धुरि=अग्रे, स्थेयाः=तिष्ठेः ।

**भावार्थः–** पूर्वोक्तकथनानुसारेण सपत्नीकः त्वं यावत्कालपर्यन्तं नन्दिनी प्रसन्ना न भवति तावत्कालपर्यन्तं सेवातत्परो भव । अहं (वसिष्ठ,) आशीर्वादं ददामि गोसेवायां तव **अविघ्नमस्तु**, त्वं पुत्रवान् भव, सत्पुत्रवताम् अग्रे तव नाम भविष्यति ।

**तथेति प्रतिजग्राह प्रीतिमान् सपरिग्रहः ।**
**आदेशं देशकालज्ञः शिष्यः शासितुराननतः ॥६२॥**

**अन्वयः–** देशकालज्ञः, प्रीतिमान्, शिष्यः, सपरिग्रहः, आनतः, (सन्) शासितुः, आदेशं, तथा, इति प्रतिजग्राह ।

**व्याख्या:–** देशकालज्ञः=(देशश्च कालश्च इति देशकालौ, तौ जानातीति देश कालज्ञः) अग्नि=सन्नि– अग्निहोत्रान्तकालाभिज्ञः प्रीतिमान्=(प्रीतिः अस्यास्तीति प्रीतिमान्) प्रहृष्टचित्तः, शिष्यः=(शासितुं योग्यः शिष्यः) अन्तेवासी, (राजा दिलीपः,) सपरिग्रहः=सपत्नीकः, आनतः=विनयनम्रः, (सन्) शासितुः=कुलगुरोः (वसिष्ठ-स्य), आदेशम्=आज्ञाम्, "तथा इति" यथोक्तप्रकारेणैव करिष्यामि इति प्रतिजग्राह स्वीचकार ।

**भावार्थः**– स्थितिज्ञः प्रहृष्टचित्तः सपत्नीकः दिलीपः विनयनम्रः सन् वसिष्ठस्य आज्ञां यथोक्तप्रकारेणैव करिष्यामि इति स्वीचकार ।

**अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम् ।**
**सूनुः सूनृतवाक् स्रष्टुर्विससर्जोर्जितश्रियम् ॥६३॥**

**अन्वयः**– अथ, प्रदोषे, दोषज्ञः, सूनृतवाक्, स्रष्टुः, सूनुः ऊर्जितश्रियं, विशांपतिं, संवेशाय, विससर्ज ।

**व्याख्याः**– अथ = गुरुवसिष्ठस्य आज्ञास्वीकारानन्तरम्, प्रदोषे = रजनीमुखे, दोषज्ञः = विद्वान्, सूनृतवाक् = (सूनृता वाक्यस्य सः सूनृतवाक्) सत्यप्रियवाक्, सृष्टुः = ब्रह्मणः, सूनुः = पुत्रः, ऊर्जित श्रियम् (ऊर्जिता श्रीः यस्य सः ऊर्जितश्रीः, तम् ऊर्जितश्रियम्) प्रवृद्धशोभम्, विशांपतिम् = मनुजेश्वरम् (दिलीपम्), संवेशाय = निद्रार्थं, विससर्ज = आज्ञापयामास ।

**भावार्थः**– नृपेण वसिष्ठस्य आज्ञास्वीकारानन्तरं सायङ्काले ब्रम्हणः मानसपुत्रः वसिष्ठ प्रवृद्धशोभं दिलीपं शयनार्थम् आज्ञापयामास ।

**सत्यामपि तपः सिद्धौ नियमापेक्षया मुनिः ।**
**कल्पवित् कल्पयामास वन्यामेवास्य संविधाम् ॥६४॥**

**अन्वयः**– कल्पवित्, मुनिः, तपः, सिध्दौ, सत्याम् अपि, नियमापेक्षया, अस्य, वन्याम्, एव संविधां, कल्पयामास।

**व्याख्याः**– कल्पवित् = व्रतप्रयोगाभिज्ञः, मुनिः = ऋषिः, (वसिष्ठः) तपः सिद्धौ = तपश्चर्यानिष्पत्तौ सत्याम् = विद्यमानायामपि, नियमापेक्षया = (नियमस्य अपेक्षा इति नियमापेक्षा, तया) तदाप्रभृत्येव व्रतचर्यापेक्षया, अस्य = राज्ञः दिलीपस्यः, वन्याम् = काननसम्बन्धिनीमेव, संविधाम् = कुशादिशयनसामग्रीम्, कल्पयामास = सम्पादयामास ।

**भावार्थः**– व्रतप्रयोगाभिज्ञः, वसिष्ठः तपस्याबलेन स्मरणमात्रेण राजयोग्याहार-सम्पादनसामर्थ्ये सत्यपि नन्दिनीसेवारूपतपश्चर्यायां संलग्नस्य दिलीपस्य कृते भोज्यपदार्थे कन्दमूलादिकम्, शयने कुशास्तरणञ्च कल्पयामास ।

**निर्दिष्टां कुलपतिना स पर्णशाला-**
**मध्यास्य प्रयतपरिग्रहद्वितीयः ।**
**तच्छिष्याध्ययननिवेदितावसानां**
**संविष्टः कुशशयने निशां निनाय ॥६५॥**

**अन्वयः**– सः, कुलपतिना, निर्दिष्टां, पणशालाम्, अध्यास्य, प्रयतपरिग्रहद्वितीयः, कुशशयने, संविष्टः, (सन्) तच्छिष्याध्ययननिवेदतावसानां, निशां, निनाय ।

**व्याख्या**:– सः=दिलीपः, कुलपतिना=मुनिकुलेश्वरेण, निर्दिष्टाम्=विज्ञापिताम्, पर्णशालाम्=पर्णकुटीम्, अध्यास्य =अधिष्ठाय, प्रयतपरिग्रहद्वितीयः= (प्रयतः परिग्रहः द्वितीयो यस्येति सः यथोक्तः) पवित्रभार्यासहायकः दिलीपः, कुशशयने=दर्भशय्यायाम्, संविष्टः=सुप्तः (सन्) तच्छिष्याध्ययननिवेदितावसानाम् (तस्य शिष्याः तच्छिष्या तच्छिष्याणाम् अध्ययनं तच्छिष्याध्ययनं तच्छिष्याध्ययनेन निवेदितम् अवसानम् यस्याः सा तच्छिष्याध्ययननिवेदितावसाना, ताम्) वसिष्ठच्छात्राध्ययनसूचितावसानाम्, निशाम्=रात्रिम्, निनाय=गमयामास । अस्मिन् श्लोके प्रहर्षिणीवृत्तम् ।

**भावार्थः**– वसिष्ठस्य आज्ञां प्राप्य दिलीपः कुलपतिना निर्दिष्टः सन् रात्रौ पर्णशालां प्रविश्य भार्यासहितः गुरुणा प्रदत्ते कुशास्तरणे सुस्वाप । रात्र्यवसाने महर्षेःवसिष्ठस्य छात्रैः कृतवेदध्वनिभिः जागरितोभूत्वा ब्राह्ममुहूर्ते उत्थितः ।

## अभ्यासः

१. कालिदासकृतमङ्गलाचरणस्य भावार्थः प्रदर्श्यताम् ।

२. ग्रन्थारम्भे कविना कीदृशं मङ्गलाचरणं कृतमिति कथ्यताम् ।

३. कालिदासस्य जन्मभूमिः कुत्रासीदिति लिखन्तु ।

४. कालिदासस्य समयो निर्दिश्यताम् ।

**५. अधस्तन श्लोकः सप्रसंगं व्याख्यायताम्**

मन्दः कवियशः प्रार्थी गमिष्यामुपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥

**६. अधोलिखितपदानां समासप्रकारो दर्शनीय**

(क) पूर्वसूरिभिः (ख) मुनिवृत्तीनाम् (ग) सदसद्व्यक्तिहेतवः

**७. अधोलिखितपदानां पर्यायो बेय**

(क) पितरौ, (ख) तितीर्षुः, (ग) त्यागाय, (घ) वार्धक्ये, (ङ) हेम्नः

८. तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापिवा ।। इत्यस्याभिप्रायः प्रकटनीयः ।

९. रघुवंशोत्पन्ना राजानः कीदृशा आसन्निति वर्ण्यताम् ।

१०. स्वशब्दैः दिलीपस्य वर्णनं कुरु ।

११. अस्य श्लोकस्य व्याख्या कार्या–

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ।।

१२. अस्य श्लोकस्य भावार्थो लेख्य

प्रजानामेव भूत्यर्थं स ताभ्यो वलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।।

१३. सप्रसङ्ग व्याख्या कार्या

जुगोपात्मानमत्रस्तो भेजेधर्ममनातुरः ।
अगृघ्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् ।।

१४. अधोलिखितपदानां समासः प्रदर्शनीय

(क) गुणानुबन्धित्वात् (ख) श्लाघाविपर्ययः (ग) सम्पदविनिमयेन (घ) भुवनद्वयम् (ङ) उरगक्षता (च) वेलावप्रवलयाम् (छ) परिखीकृतसागराम् (ज) अनन्यशासनाम् (झ) आत्मजन्मसमुत्सुकः (ञ) विलम्बितफलैः ।

१५. अस्य श्लोकस्य अन्वयं प्रदर्शय

अथाभ्यर्च्य विधातारं प्रयतो पुत्रकाम्यया ।
तौ दम्पती वसिष्ठस्य गुरोर्जग्मतुराश्रमम् ।।

१६. अधोलिखितानां शब्दानां पर्यायो देय

(क) प्रावृषेण्यम् (ख) परिमेयपुरः सरौ (ग) पुष्परेणूत्किरैः (घ) केका (ङ) शिखण्डिभिः (च) तोरणस्रजम् (छ) रजोभिः (ज) सरसीषु (झ) यूपचिन्हेषु (ञ) हैयङ्गवीनम् (ट) घोषवृद्धान् (ठ) हिमनिर्मुक्तयोः (ड) लंघितम् (ढ) दुष्प्रापयशाः (ण) समित्कुशफलाहरैः (त) नीवारः (थ) सेकान्ते (द) वर्तितरोमन्थम् (ध) अभ्युत्थिताग्निपिशुनैः (न) यन्तारम्

१७. अस्य श्लोकस्य व्याख्या कार्या

स्थित्यै दण्डयतो दण्डयान् परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ।।

१८. निम्न श्लोकस्य आशयं प्रकटयत

विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम् ।
अन्वसितमरून्धत्या स्वाहयेव हविर्भुजम् ।।

**१९. अधोलिखितश्लोकस्य भावार्थो लेख्य**

सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ।।

२०. (क) उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।
दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदाम् ।

(ख) तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् ।
पप्रच्छ कुशलं राज्यं राज्याश्रममुनिं मुनिः ।

(ग) पुरुषायुषजीविन्यो निरातङ्का निरीतयः ।
यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम् ।।

(घ) नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ।
न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ।।

(ङ) सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ।।

**उपर्युक्तेषु श्लोकेषु केषांचित् त्रयाणां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या**

२१. (क) तया हीनं विधातर्मां कथं पश्यन्न दूयसे ।
सिक्तं स्वयमिव स्नेहाद् वन्ध्यमाश्रमवृक्षकम् ।।

(ख) इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ।
क्षणमात्रमृषिस्तस्थौ सुप्तमीन इवं ह्रदः ।।

(ग) धर्मलोपभयाद् राज्ञीमृतुस्नातामिमां स्मरन् ।
प्रदक्षिणाक्रियार्हायां तस्यां त्वं साधु नाचरः ।।

(घ) स शापो न त्वया राजन् न च सारथिना श्रुतः ।
नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ।।

(ङ) ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला ।
बिभृती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम् ।।

**उपर्युक्तेषु श्लोकेषु केषांचित् त्रयाणां प्रसङ्गनिर्देशपूर्वकं भावार्थो लेख्यः**

२२. दिलीपस्य वसिष्ठाश्रमगमनस्य वर्णनं कुरु ।

२३. दिलीपवसिष्ठयोः संवादो वर्ण्यताम् ।

२४. वसिष्ठाश्रमस्य वर्णनं कुरु ।

२५. नन्दिन्याः विषये वर्णनं कुरु ।

२६. गोसेवाप्रकारः वर्णनीयः ।

२७. वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम् ।
विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ।। इत्यस्याभिप्रायः प्रकटनीयः ।

२८. निम्नशब्दस्य अर्थो लेख्यः

(क) संविष्टः (ख) कुशशयने (ग) पर्णशालाम् (घ) दोषज्ञः (ङ) सूनृतवाक्
(च) परिचर्यापरः ।

२९. रघुवंश-प्रथमसर्गस्य कथासारो लेख्यः ।

३०. कानि राज्याङ्गानि ?

३१. ईतयः काः ?

३२ दिलीपः कथं जनानां पिता बभूव ?

३३. दिलीपस्य सन्ततिनिरोध कारणं किमासीत् ?

३४. राजदम्पती कस्मिन् समये वशिष्ठं अपश्यताम् ?

३५. वशिष्ठः दिलीपस्य सन्ततिनिरोधकारणं कथं ज्ञातवान ?

३६. वशिष्ठः राजानं सन्ततिप्राप्त्युपायं कं निर्दिष्टवान ?

## कक्षागत रूपमा कक्षा ८ का विद्यार्थीले गाउने राष्ट्रिय गीत

तराई हेर कति राम्रो हरियो वन हुनाले
पहाड हेर झनै राम्रो गुराँस फुल्नाले
म त हेर त्यसै राम्रो यसै राम्रो
त्यसै राम्रो नेपाली हुनाले
सगरमाथा मेरै आफ्नो शिर भइदिनाले ।।

अरूको भरमा बाँच्नु पर्छ हातै नहुनेले
एक दिन भोकै मर्नु पर्छ पौरख नहुनेले
म त मेरै पौरख खान्छु
म त हातका नङ्ग्रा खियाउँछु, नेपाली हुनाले
सारा नेपालीको लक्ष्य एउटै भइदिनाले ।।

अरूको सारमा हिंड्नु पर्छ आँखै नहुनेले
अन्यायलाई सहनु पर्छ निर्धो भइदिनाले
म त अन्यायसित लड्छु,
ठूलो सानो एउटै देख्छु, नेपाली हुनाले
राजा-रानी मेरै दुइटा आँखा भइदिनाले ।।

संस्कृतसाहित्यम् (ऐच्छिकम्) कक्षा ८